Aacharya vijay shri Surendrasuriswarji Jain Tatvagyanshala

सहस्रावधानिश्रीमुनिसुंदरसूरि कृत

# अध्यात्मकल्पद्रुमः

प्रेरणादाता

पू. आ. श्री वि. रामसूरीश्वरजी म.
( डहेलावाला )

प्रकाशक

आ. श्री सुरेन्द्रसूरीश्वरजी जैन तत्वज्ञानशाला.
अमदावाद.

www.jaintatvagyanshala.org

Aacharya vijay shri Surendrasuriswarji Jain Tatvagyanshala

॥ ऐं नमः ॥

॥ ॐ ह्रीँ श्रीँ शंखेश्वरपार्श्वनाथाय नमः ॥

॥ नमो नमः श्री गुरु सुरेन्द्रसूरये ॥

सहस्रावधानिश्रीमुनिसुंदरसूरि कृत

# अध्यात्मकल्पद्रुम

तथा

# अयोग-अन्ययोगद्वात्रिंशिका

# महादेवस्तोत्र आदि संग्रह

प्रेरणादाता

प. पू. आ. भ. श्री वि. रामसूरीश्वरजी म.

( डहेलानां उपाश्रयवाला )

प्रकाशक

आ. श्री सुरेन्द्रसूरीश्वरजी जैन तत्त्वज्ञानशाला,

झवेरीवाड, पटणीनी खडकी, अमदावाद-१.

www.jaintatvagyanshala.org

Aacharya vijay shri Surendrasuriswarji Jain Tatvagyanshala

વીર સંવત ૨૫૧૮ મહા સુદ ૫
વિક્રમ સંવત ૨૦૪૮ વસંત પંચમી

: પ્રાપ્તિસ્થાન :
આ. શ્રી સુરેન્દ્રસૂરીશ્વરજી જૈન તત્ત્વજ્ઞાનશાલા
ઝવેરીવાડ, પટણીની ખડકી, અમદાવાદ-૧.

દ્રવ્યસહાયક
**શ્રી કુવાલા જૈન સંઘ**
(બનાસકાંઠા)

નકલ ૧૦૦૦ મૂલ્ય : રૂ. ૫-૦૦

મુદ્રક : કાન્તિલાલ ડી. શાહ "ભરત પ્રિન્ટરી" ન્યુ માર્કેટ,
પાંજરાપોળ, રીલીફ રોડ, અમદાવાદ-૩૮૦૦૦૧.
ફોન : ૩૮૭૯૬૪

www.jaintatvagyanshala.org

# નિમિત્તમાત્રમ્

પરમાત્મા શ્રી જિનેશ્વર ભગવંતના શાસનમાં સ્વ-પરહિતચિંતક એવા મહાપુરુષોનાં એક એક શબ્દમાં જીવનનાં ગંભીર રહસ્યો છુપાયેલાં હોય છે. હૃદયનાં અંતરાલમાંથી નીકળતાં એ શબ્દો કલિકાલે પણ સર્વ જીવોને માટે દીવાદાંડી સમ ભાસે છે.

આ લઘુ પુસ્તિકામાં મહાપુરુષોએ રચેલા ગ્રંથોનો સંગ્રહ જ છે. સૌ પ્રથમ ૧૫મા સૈકાનાં મહાન જ્યોતિર્ધર સહસ્રાવધાનિ આચાર્ય શ્રી મુનિસુંદરસૂરિજી કૃત અધ્યાત્મ કલ્પદ્રુમ, ત્યારબાદ કલિકાલસર્વજ્ઞ આચાર્ય શ્રી હેમચન્દ્ર-સૂરીશ્વરજી મ. કૃત અયોગ-અન્યયોગ દ્વાત્રિંશિકા અને મહાદેવ સ્તોત્ર છે. જૈનદર્શનનાં સારને બતાવનારા આ ત્રણે લઘુ સ્તોત્રો બહુ ઓછા સ્થળોએ જોવા મળતાં હોઇ અભ્યાસી-ઓને એ સરળતાંથી પ્રાપ્ત થાય તે હેતુથી જ અત્રે મૂકવામાં આવેલા છે. અંતે અત્યંત પ્રચલિત આત્મનિવેદન સ્વરૂપ આ. શ્રી રત્નાકરસૂરિ કૃત રત્નાકરપચ્ચીસી મૂકવામાં આવેલી છે.

આજથી ૭-૮ વર્ષ પૂર્વે મને અધ્યાત્મકલ્પદ્રુમ ગ્રંથ ભણાવતાં પૂજ્ય ગુરુદેવશ્રીએ તેનાં ભાવોને આસ્વાદીને સંકલ્પ કર્યો કે આ ગ્રંથ મારે પણ કંઠસ્થ કરવો અને તે વખતે જ પૂજ્યશ્રીએ અડધો ગ્રંથ કંઠસ્થ કરી લીધો. બાદમાં તબિયતાદિનાં કારણે ગ્રંથ પૂર્ણ ન થયેલ તે

સં. ૨૦૪૭ના ગત ચાતુર્માસમાં ડહેલાના ઉપાશ્રયે આ ગ્રંથ સંપૂર્ણ કંઠસ્થ કરી પૂર્ણ કર્યો.

અધ્યાત્મકલ્પદ્રુમમાં ગ્રંથકાર ભગવંતે પોતાનાં જીવનનાં જ્ઞાનનો નિચોડ ખૂબ જ સચોટ રીતે દર્શાવ્યો છે. એકેક શ્લોકે વૈરાગ્યરસનાં ભંડારો જ ભરી દીધાં છે. તે રસનો આસ્વાદ મેળવવો એ જીવનનો લ્હાવો છે.

પૂ. સાધુ-સાધ્વીજી મ.ને આ ગ્રંથ કંઠસ્થ કરવા માટે સ્વતંત્ર લઘુપુસ્તિકાની આવશ્યક્તા જાણી છપાવવાની ભાવના હતી જ તેમાં શ્રી કુવાલા સંઘે ઉદારતાપૂર્વક આ ગ્રંથનાં મુદ્રણની જવાબદારી લીધી અને તે પૂજ્યશ્રીનાં ૭૬મા જન્મવર્ષનાં પ્રવેશ દિને વિ. સં. ૨૦૪૮ વસંત-પંચમીએ પ્રકાશિત થઇ રહ્યો છે તે આનંદની વાત છે.

આ પ્રથમ પ્રયાસમાં કેટલીક ક્ષતિઓ રહી જવા પામી છે. તે ક્ષતિઓને સુધારી લેવા નમ્ર ભલામણ......

પ્રાન્તે પૂ. સાધુ-સાધ્વીજી મ. આ ગ્રંથોનાં વધુને વધુ સ્વાધ્યાય દ્વારા સ્વજીવનને ઉન્નત બનાવી સ્વ-પરનાં કલ્યાણને સાધે એ જ અભ્યર્થના ॥

મહા સુદ ૧
સં. ૨૦૪૮
ઝવેરી પાર્ક

ગુરુકૃપાકાંક્ષી
**જગચ્ચન્દ્રવિજય**

# शुद्धिपत्रकम्

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ३ | १६ | तवत्मन | तवात्मन् |
| ५ | ८ | शुचिमेषि | शुचमेषि |
| ६ | ३ | दुर्गतीश्च | दुर्गतीश्च |
| ६ | १० | कृमिजाल- | कृमिजाल |
| ७ | १ | मवान्तरे | भवान्तरे |
| ७ | ६ | भिथोऽगवताम | मिथोंगवताम् |
| ८ | १७ | कुरुषु | कुरुषे |
| ८ | १८ | दुःखभीति | दुःखभीतेः |
| १० | २ | कार्य | कार्यं |
| १० | १२ | सभीपं | समीपं |
| ११ | १४ | लमेतै- | लभेतै- |
| ११ | १८ | तदुर्क | तदुर्द्के |
| १२ | १० | द्विबबत्सु | द्विषत्सु |
| १३ | ४ | नम | नभ |

Aacharya vijay shri Surendrasuriswarji Jain Tatvagyanshala

| पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १६ | ४ | भवाभ्यस्त्वया | भवाभ्यस्त्वया |
| १८ | १७ | स्वाध्वायोगै- | स्वाध्याययोगै- |
| २१ | १ | भिक्षुकाद्यैः | भिक्षुकाद्यैः- |
| २२ | १२ | भेद्विषि | द्विभेषि |
| ३१ | ४ | येऽर्हः | यैंऽर्हः |
| ३२ | ३ | तयोमिथः | तयोर्मिथः |
| ४२ | १३ | तद्ःखमा- | तद्दुःखमा- |
| ५० | २० | मूमूर्तार्त | मूर्तामूर्त |

www.jaintatvagyanshala.org

सहस्रावधानिश्रीमुनिसुन्दरसूरिविरचित—

# ॥ अध्यात्मकल्पद्रुमः ॥

जयश्रीरांतरारीणां, लेभे येन प्रशांतितः । तं श्रीवीरजिनं नत्वा, रसः शांतो विभाव्यते ॥ १ ॥ सर्वमंगलनिधौ हृदि यस्मिन्, संगते निरुपमं सुखमेति । मुक्तिशर्म च वशीभवति द्राक्, तं बुधा भजत शांतरसेंद्रम् ॥२॥ समतैकलीनचित्तो, ललनापत्यस्वदेहममतामुक्। विषयकषायाद्यवशः शास्त्रगुणैर्दमितचेतस्कः ॥३॥ वैराग्यशुद्धधर्मा देवादिसतत्त्वविद्विरतिधारी । संवरवान् शुभवृत्तिः साम्यरहस्यं भज शिवार्थिन् ॥ ४ ॥ युग्मम् ॥

## । अथ प्रथमः समताधिकारः ।

चित्तबालक मा त्याक्षीरजस्रं भावनौषधीः । यत्त्वां दुर्ध्यानभूतानछलयन्ति छलान्विषः ॥ ५ ॥ यदिंद्रियार्थैः सकलैः सुखं स्यान्नरेन्द्रचक्रित्रिदशाधिपानाम् । तद्‌बिंदवत्येव पुरो हि साम्यसुधांबुधेस्तेन तमाद्रियस्व ॥ ६ ॥ अदृष्टवैचित्र्यवशाज्जगज्जने,

विचित्रकर्माशयवाग्विसंस्थुले । उदासवृत्तिस्थित-
चित्तवृत्तयः, सुखं श्रयंते यतयः क्षतार्तयः ॥ ७ ॥
विश्वजंतुषु यदि क्षणमेकं, साम्यतो भजसि मानस
मैत्रीम् । तत्सुखं परममत्र परत्राप्यश्नुषे न यदभूत्तव.
जातु ॥ ८ ॥ न यस्य मित्रं न च कोऽपि शत्रुर्निजः
परो वापि न कश्चनास्ते । न चेन्द्रियार्थेषु रमेत
चेतः, कषायमुक्तः परमः स योगी ॥ ९ ॥ भजस्व
मैत्रीं जगदङ्गिराशिषु, प्रमोदमात्मन् गुणिषु त्वशेषतः ।
भवार्तिदीनेषु कृपारसं सदाप्युदासवृत्तिं खलु निर्गु-
णेष्वपि ॥ १० ॥ मैत्री परस्मिन् हितधीः समग्रे,
भवेत्प्रमोदो गुणपक्षपातः । कृपा भवार्त्ते प्रतिकर्तु-
मीहोपेक्षैव माध्यस्थ्यमवार्यदोषे ॥ ११ ॥ परहित-
चिन्तामैत्री, परदुःखविनाशिनी तथा करुणा ।
परसुखतुष्टिर्मुदिता, परदोषोपेक्षणमुपेक्षा ॥ १२ ॥
मा कार्षीत्कोऽपि पापानि, मा चाभूत्कोऽपि दुःखितः
मुच्यतां जगदप्येषा, मतिर्मैत्री निगद्यते ॥ १३ ॥
अपास्ताशेषदोषाणां, वस्तुतत्त्वावलोकिनाम् । गुणेषु
पक्षपातो यः, स प्रमोदः प्रकीर्तितः ॥ १४ ॥
दीनेष्वार्तेषु भीतेषु, याचमानेषु जीवीतम् । प्रति-

कारपरा बुद्धिः, कारुण्यमभिधीयते ॥ १५ ॥ क्रूरकर्मसु निशंकं देवतागुरुनिंदिषु । आत्मशंसिषु, योपेक्षा, तन्माध्यस्थ्यमुदीरितम् ॥ १६ ॥ चेतनेतरगतेष्वखिलेषु, स्पर्शरूपरवगंधरसेषु । साम्यमेष्यति यदा तव चेतः, पाणिगं शिवसुखं हि यदात्मन् ॥ १७ ॥ के गुणास्तव यतः स्तुतिमिच्छस्यद्भुतं किमकृथा मदवान् यत् । कैर्गता नरकभीः सुकृतैस्ते, किं जितःपितृपतिर्यद्-चिन्तः ॥ १८ ॥ गुणस्तवैर्यो गुणिनां परेषामाक्रोश-निंदादिभिरात्मनश्च । मनः समं शीलति मोदते वा, खिद्येत च व्यत्ययतः स वेत्ता ॥ १९ ॥ न वेत्सि शत्रून् सुहृदश्च नैव, हिताहिते स्वं न परं च जन्तोः । दुखं द्विषन् वांछसि शर्म चैतन्निदानमूढः कथमाप्स्य-सीष्टम् ॥ २० ॥ कृती हि सर्वं परिणामरम्यं विचार्य गृह्णाति चिरस्थितीह । भवान्तरेऽनन्तसुखाप्तये तद् आत्मन् किमाचारमिमं जहासि ॥ २१ ॥ निजः परो वेति कृतो विभागो, रागादिभिस्तेत्वरयस्तवात्मन् । चतुर्गतिक्लेशविधानतस्तत् प्रमाणयन्नस्यरिनिर्मितं किम् ॥ २२ ॥ अनादिरात्मा न निजः परो वा, कस्यापि कश्चिन्न रिपुः सुहृद्वा । स्थिरा न देहा-

कृतयोऽणवश्च, तथापि साम्यं किमुपैषि नैषु ॥ २३ ॥
यथा विदां लेप्यमया न तत्त्वात्, सुखाय माता-
पितृपुत्रदाराः । तथा परेऽपीह विशीर्णतत्तदाकारमेतद्धि
समं समग्रम् ॥ २४ ॥ जानन्ति कामान्निखिलाः
ससंज्ञाः, अर्थं नराः केऽपि च केऽपि धर्मम् ।
जैनं च केचिद् गुरुदेवशुद्धं, केचित् शिवं केऽपि
च केऽपि साम्यम् ॥ २५ ॥ स्निह्यन्ति तावद्धि
निजा निजेषु, पस्यन्ति यावन्निजमर्थमेभ्यः । इमां
भवेऽत्रापि समीक्ष्य रीतिं, स्वार्थे न कः प्रेत्य हिते
यतेत ॥२६ ॥ स्वप्नेंद्रजालादिषु यद्वदाप्तै रोषश्च
तोषश्च मुधा पदार्थैः । तथा भवेऽस्मिन् विषयैः
समस्तैरेवं विभाव्यात्मलयेऽवधेहि ॥ २७ ॥ एष मे
जनयिता जननीयं, बन्धवः पुनरिमे स्वजनाश्च ।
द्रव्यमेतदिति जातममत्वो, नैव पश्यसि कृतांतवश-
त्वम् ॥ २८ ॥ नो धनैः परिजनैः स्वजनैर्वा, दैवतैः
परिचितैरपि मन्त्रैः । रक्ष्यतेऽत्र खलु कोऽपि कृतां-
तान्नो विभावयसि मूढ किमेवम् ॥ २९ ॥ तैर्भवेऽपि
यदहो सुखमिच्छंस्तस्य साधनतया प्रतीभातैः ।
मुह्यसि प्रतिकलं विषयेषु, प्रीतिमेषि न तु साम्य-

सतत्त्वे ॥ ३० ॥ (अर्थतो युग्मम्) ॥ किं कषाय-कलुषं कुरुषे स्वं, केषुचीन्ननु मनोऽरीधियात्मन् । तेऽपी ते हि जनकादीकरूपैरीष्टतां दधुरनन्तभवेषु ॥३१॥ यांश्च शोचसि गताः कीमिमे मे, स्नेहला इति धिया विधुरात्मा । तैर्भवेषु नीहतस्त्वमनंतेष्वेव, तेऽपि निहता भवता च ॥३२॥ त्रातुं न शक्या भव-दुःखतो ये, त्वया न ये त्वामपि पातुमीशाः । ममत्वमे-तेषु दधन्मुधात्मन्, पदे पदे किं शुचिमेषि मूढ ॥३३॥ सचेतनाः पुद्गलपिंडजीवा, अर्थाः परे चाणुमया द्वयेऽपि । दधत्यनंतान् परीणामभावांस्तत्तेषु कस्त्वर्हति रागरोषौ ॥ ३४ ॥

। अथ द्वितीयः स्त्रीममत्वमोचनाधिकारः ।

मुह्यसि प्रणयचारुगिरासु, प्रीतितः प्रणयिनीषु कृतिस्त्वम् । किं न वेत्सि पततां भववार्धौ, ता नृणां खलु शिला गलबद्धाः ॥ १ ॥ चर्मास्थि-मज्जान्त्रवसास्रमांसामेध्याद्यशुच्यस्थिरपुद्गलानाम् । स्त्रीदेहपिंडाकृतिसंस्थितेषु, स्कंधेषु किं पश्यसि रम्य-मात्मन् ॥२॥ विलोक्य दूरस्थममेध्यमल्पं, जुगुप्ससे मोटितनासिकस्तवम् । भृतेषु तेनैव विमूढ योषा-

वपुःषु तत्किं कुरुषेऽभिलाषम् ॥३॥ अमेध्यमांसास्रव-सात्मकानि, नारीशरीराणि निषेवमाणाः । इहाप्य-पत्यद्रविणादिचिंतातापान् परत्र प्रति दुर्गतीश्च ॥४॥ अङ्गेषु येषु परिमुह्यसि कामिनीनां, चेतः प्रसीद विश च क्षणमंतरेषाम् । सम्यक् समीक्ष्य विरमाशुचि-पिंडकेभ्यस्तेभ्यश्च शुच्यशुचिवस्तुविचारमिच्छन् ॥५॥ विमुह्यसि स्मेरदृशः सुमुख्या, मुखेक्षणादीन्यभिवीक्ष-माणः । समीक्षसे नो नरकेषु तेषु मोहोद्भवा भाविकदर्थनास्ताः ॥६॥ अमेध्यभस्त्रा बहुरंध्रनिर्यन्-मलाविलोद्यत्कृमिजालकीर्णा । चापल्यमायानृतवंचिका स्त्री, संस्कारमोहान्नरकाय भुक्ता ॥७॥ निर्भूमिविष-कंदली गतदरी व्याघ्री निराह्वो महाव्याधिर्मृत्युर-कारणश्च ललनाऽनभ्रा च वज्राशनिः । बंधुस्नेहविघात-साहसमृषावादादिसंतापभूः, प्रत्यक्षापि च राक्षसीति बिरुदैः ख्याताऽऽगमे त्यज्यताम् ॥८॥ ।४२।

। अथ तृतीयोऽपत्यममत्वमोचनाधिकारः ।

मा भूरपत्यान्यवलोकमानो, मुदाकुलो मोहनृ-पारिणा यत् । चिक्षिप्सया नारकचारकेऽसि, दृढं निबद्धो निगडैरमीभिः ॥ १ ॥ आजीवितं जीव

भवान्तरेऽपि वा, शल्यान्यपत्यानि न वेत्सि किं हृदि । चलाचलैर्यैर्विविधार्तिदानतोऽनिशं निहन्येत समाधिरात्मनः ॥ २ ॥ कुक्षौ युवत्याः कृमयो विचित्रा, अप्यस्रशुक्रप्रभवा भवन्ति । न तेषु तस्या नहि तत्पतेश्च, रागस्ततोऽयं किमपत्यकेषु ॥ ३ ॥ त्राणाशक्तेरापदि संबंधानंत्यतो मिथोऽगवताम । संदेहाच्चोपकृतेर्मापत्येषु स्निहो जीव ॥ ४ ॥ । ४६ ।

। अथ चतुर्थो धनममत्वमोचनाधिकारः ।

याः सुखोपकृतिकृत्वधिया त्वं, मेलयन्नसि रमा ममताभाक् । पाप्मनोऽधिकरणत्वत एता, हेतवो ददति संसृतिपातम् ॥ १ ॥ यानि द्विषामप्युपकारकाणि, सर्पोन्दुरादिष्वपि यैर्गतिश्च । शक्या च नापन्मरणामयाद्या, हन्तुं धनेष्वेषु क एव मोहः ॥२॥ ममत्वमात्रेण मनःप्रसादसुखं धनैरल्पकमल्पकालम् । आरंभपापैः सुचिरं तु दुःखं, स्याद्दुर्गतौ दारुणमित्यवेहि ॥३॥ द्रव्यस्तवात्मा धनसाधनो न धर्मोऽपि सारंभतयातिशुद्धः । निःसंगतात्मा त्वतिशुद्धयोगात्, मुक्तिश्रियं यच्छति तद्भवेऽपि ॥४॥ क्षेत्रवास्तुधनधान्यगवाश्वैर्मेलितैः सनिधिभिस्तनुभा-

जाम् । क्लेशपापनरकाभ्यधिकः स्यात्को गुणो न यदि धर्मनियोगः ।।५।। आरंभैर्भरितो निमज्जति यतः प्राणी भवांभोनिधावीहंते कुनृपादयश्च पुरुषा येनच्छलाद्बाधितुम् । चिंताव्याकुलताकृतेश्च हरते यो धर्मकर्मस्मृतिं, विज्ञा ! भूरिपरिग्रहं त्यजत तं भोग्यं परैः प्रायशः ।।६।। क्षेत्रेषु नो वपसि यत्सदपि स्वमेतद्यातासि तत्परभवे किमिदं गृहीत्वा । तस्यार्जनादिजनिताघचयार्जितात्ते, भावी कथं नरकदुःखभराच्च मोक्षः ।।७।। ५३ ।।

। अथ पंचमो देहममत्वमोचनाधिकारः ।

पुष्णासि यं देहमघान्यचिंतयंस्तवोपकारं कमयं विधास्यति । कर्माणि कुर्वन्निति चिंतयायतिं, जगत्ययं वंचयते हि धूर्त्तराट् ।। १ ।। कारागृहाद्बहुविधाशुचितादिदुःखान्निर्गंतुमिच्छति जडोऽपि हि तद्विभिद्य । क्षिप्तस्ततोऽधिकतरे वपुषि स्वकर्मव्रातेन तद्दृढयितुं यतसे किमात्मन् ।।२।। चेद्वांछसीदमवितुं परलोकदुःखभीत्या ततो न कुरुषे किमु पुण्यमेव । शक्यं न रक्षितुमिदं हि नं दुःखभीतिः पुण्यं विना क्षयमुपैति च वज्रिणोऽपि ।।३।। देहे

विमुह्य कुरुषे- किमघं न वेत्सि, देहस्थ एव भजसे भवदुःखजालम् । लोहाश्रितो हि सहते घनघातमग्निर्बाधा न तेऽस्य च नभोवदनाश्रयत्वे ॥४॥ दुष्टः कर्मविपाकभूपतिवशः कायाह्वयः कर्मकृत्, बद्ध्वा कर्मगुणैर्हृषीकचषकैः पीतप्रमादासवम् । कृत्वा नारकचारकापदुचितं त्वां प्राप्य चाशु च्छलं, गन्तेति स्वहिताय संयमभरं तं वाहयाल्पं ददत् ॥५॥ यतः शुचीन्यप्यशुचीभवन्ति । कृम्याकुलात्काकशुनादिभक्ष्यात् । द्राग्भाविनो भस्मतया ततोऽङ्गात्, मांसादिपिंडात् स्वहितं गृहाण ॥६॥ परोपकारोऽस्ति तपो जपो वा, विनश्वराद्यस्य फलं न देहात् । सभाटकादल्पदिनाप्तगेहमृत्पिंडमूढः फलमश्नुते किम् ॥७॥ मृत्पिंडरूपेण विनश्वरेण, जुगुप्सनीयेन गदालयेन । देहेन चेदात्महितं सुसाध्यं, धर्मान्न किं तद्यतसेऽत्र मूढ ! ॥८॥ ६१ ॥

॥ अथ षष्ठो विषयप्रमादत्यागाधिकारः ।

अत्यल्पकल्पितसुखाय किमिन्द्रियार्थैस्त्वं मुह्यसि प्रतिपदं प्रचुरप्रमादः । एते क्षिपन्ति गहने भवभीमकक्षे, जंतुन्न यत्र सुलभा शिवमार्गदृष्टिः ॥ १ ॥

आपातरम्ये परिणामदुःखे, सुखे कथं वैषयिके रतो-
ऽसि । जडोऽपि कार्यं रचयन् हितार्थी, करोति
विद्वन् यदुदर्कतर्कम् ॥२॥ यदिन्द्रियार्थैरिह शर्म
बिंदुवद्यदर्णवत्स्वःशिवगं परत्र च । तयोर्मिथोऽस्ति
प्रतिपक्षता कृतिन्, विशेषदृष्ट्यान्यतरद् गृहाण तत्
॥३॥ भुंक्ते कथं नारकतिर्यगादिदुःखानि देहीत्य-
वधेहि शास्त्रैः । निवर्तते ते विषयेषु तृष्णा, बिभेषि
पापप्रचयाच्च येन ॥४॥ गर्भवासनरकादिवेदनाः,
पश्यतोऽनवरतं श्रुतेक्षणैः । नो कषायविषयेषु मानसं,
श्लिष्यते बुध विचिंतयेति ताः ॥५॥ वध्यस्य
चौरस्य यथा पशोर्वा, संप्राप्यमाणस्य पदं वधस्य ।
शनैः शनैरेति मृतिः समीपं, तथाखिलस्येति कथं
प्रमादः ॥६॥ बिभेषि जंतो! यदि दुःखराशेस्त-
दिंद्रियार्थेषु रतिं कृथा मा । तदुद्भवं नश्यति शर्म
यद्राक्, नाशे च तस्य ध्रुवमेव दुःखम् ॥७॥
मृतः किमु प्रेतपतिर्दुरामया, गताः क्षयं किं नर-
काश्च मुद्रिताः । ध्रुवाः किमायुर्धनदेहबंधवः,
सकौतुको यद्विषयैर्विमुह्यसि ॥८॥ विमोह्यसे किं
विषयप्रमादैर्भ्रमात्सुखस्यायतिदुःखराशेः । तद्गर्धमु-

क्तस्य हि यत्सुखं ते गतोपमं चायतिमुक्तिदं तत् ॥९॥ ७० ॥

। अथ सप्तमः कषायत्यागाधिकारः ।

रे जीव ! सेहिथ सहिष्यसि च व्यथास्तास्त्वं नारकादिषु पराभवभूः कषायैः । मुग्धोदितैः कुवचनादिभिरप्यतः किं, क्रोधान्निहंसि निजपुण्यधनं दुरापम् ॥ १ । पराभिभूतौ यदि मानमुक्तिस्ततस्तपोऽखंडमतः शिवं वा । मानादृतिर्दुर्वचनादिभिश्चेत्तपः—क्षयस्तन्नरकादि दुःखम् ॥ २ ॥ वैरादि चात्रेति विचार्य लाभालाभौ कृतिन्नाभवसंभविन्याम् । तपोऽथवा मानमवा (था ?)भिभूताविहास्ति नूनं हि गतिर्द्विधैव ॥ ३ ॥ श्रुत्वाक्रोशान् यो मुदा पूरितःस्यात्, लोष्टाद्यैर्यश्चाहतो रोमहर्षी । यः प्राणान्तेऽप्यन्यदोषं न पश्यत्येष श्रेयो द्राग् लभेतैवयोगी ॥ ४ ॥ को गुणस्तव कदा च कषायैर्निर्ममे भजसि नित्यमिमान् यत् । किं न पश्यसि दोषाममीषां, तापमत्र नरकं च परत्र ॥ ५ ॥ यत्कषायजनितं तव सौख्यं, यत्कषायपरिहानिभवं च । तद्विशेषमथवैतदुदर्कं, संविभाव्य भज धीर विशिष्टम् ॥ ६ ॥ सुखेन

Aacharya vijay shri Surendrasuriswarji Jain Tatvagyanshala


साध्या तपसां प्रवृत्तिर्यथा तथा नैव तु मानमुक्तिः । आद्या न दत्तेऽपि शिवं परा तु, निदर्शनाद्बाहुबलेः प्रदत्ते ॥७॥ सम्यग्विचार्येति विहाय मानं, रक्षन् दुरापाणि तपांसि यत्नात् । मुदा मनीषी सहतेऽभिभूतीः, शूरः क्षमायामपि नीचजाताः ॥८॥ पराभिभूत्याल्पिकयापि कुप्यस्यधैरपीमां प्रतिकर्तुमिच्छन् । न वेत्सि तिर्यङ्नरकादिकेषु, तास्तैरनंतास्त्वतुला भवित्रीः ॥९॥ धत्से कृतिन्! यद्यपकारकेषु, क्रोधं ततो धेह्यरिषट्क एव । अथोपकारिष्वपि तद्भवार्तिकृत्कर्महन्मित्रबहिर्द्विषत्सु ॥१०॥ अधीत्यनुष्ठानतपःशमाद्यान्, धर्मान् विचित्रान् विदधत्समायान् । न लप्स्यसे तत्फलमात्मदेहक्लेशाधिकं तांश्च भवांतरेषु ॥११॥ सुखाय धत्से यदि लोभमात्मनो, ज्ञानादिरत्नत्रितये विधेहि तत् । दुःखाय चेदत्र परत्र वा कृतिन् परिग्रहे तद्बहिरांतरेऽपि च ॥१२॥ करोषि यत्प्रेत्यहिताय किंचित्, कदाचिदल्पं सुकृतं कथंचित् । माऽजीहरस्तन्मदमत्सराद्यैर्विना च तन्मा नरकातिथिर्भूः ॥१३॥ पुरापि पापैः पतितोऽसि संसृतौ, दधासि रे किं गुणिमत्सरं

www.jaintatvagyanshala.org

पुनः । न वेत्सि किं घोरजले निपात्यसे, नियंत्र्यसे श्रृंखलया च सर्वतः ॥ १४ ॥ कष्टेन धर्मो लवशो मिलत्ययं, क्षयं कषायैर्युगपत् प्रयाति च । अति-प्रयत्नार्जितमर्जुनं ततः, किमङ्ग ! ही हारयसे नम-स्वता ॥ १५ ॥ शत्रूभवन्ति सुहृद कलुषीभवन्ति, धर्मा यशांसि निचितायशसीभवन्ति । स्निह्यन्ति नैव पितरोऽपि च बांधवाश्च, लोकद्वयेऽपि विपदो भविनां कषायैः ॥ १६ ॥ रुपलाभकुलविक्रमविद्या-श्रीतपोवितरणप्रभुताद्यैः । किं मदं वहसि वेत्सि न, मूढाऽनंतशः स्वभृशलाघवदुःखम् ॥ १७ ॥ विना कषायान्न भवार्त्तिराशिर्भवेद्भवेदेव च तेषु सत्सु । मूलं हि संसारतरोः कषायास्तत्तान् विहायैव सुखी भवात्मन् ॥ १८ ॥ समीक्ष्य तिर्यङ्नरकादिवेदनाः, श्रुतेक्षणैर्धर्मदुरापतां तथा । प्रमोदसे यद्विषयैः संकौतुकैस्ततस्तवात्मन् ! विफलैव चेतना ॥ १९ ॥ चौरैस्तथा कर्मकरैर्गृहीते, दुष्टैः स्वमात्रेऽप्युपतप्यसे त्वम् । पुष्टैः प्रमादैस्तनुभिश्च पुण्यधनं न किं वेत्स्यपि लुट्यमानम् ॥ २० ॥ मृत्योः कोऽपि न रक्षितो न जगतो दारिद्र्यमुत्रासितं, रोगस्तेननृपादिजा

न च भियो निर्णाशिताः षोडश । विध्वस्ता नरका न नापि सुखिता धर्मैस्त्रिलोकी सदा, तत्को नाम गुणो मदश्च विभुता का ते स्तुतीच्छा च का ॥ २१ ॥ ॥ ९१ ॥

। अथाष्टमः शास्त्रगुणाधिकारः ।

शिलातलाभे हृदि ते वहंति, विशंति सिद्धान्तरसा न चान्तः । यदत्र नो जीवदयार्द्रता ते, न भावनांकुरततिश्च लभ्या ॥ १ ॥ यस्यागमांभोदरसैर्न धौतः, प्रमादपंकः स कथं शिवेच्छुः । रसायनैर्यस्य गदाः क्षता नो, सुदुर्लभं जीवितमस्य नूनम् ॥२॥ अधीतिनोऽर्चादिकृते जिनागमः, प्रमादिनो दुर्गतिपापतेर्मुधा । ज्योतिर्विमूढस्य हि दीपपातिनो, गुणाय कस्मै शलभस्य चक्षुषी ॥३॥ मोदन्ते बहुतर्कतर्कणचणाः केचिज्जयाद्वादिनां, काव्यैः केचन कल्पितार्थघटनैस्तुष्टाः कविख्यातितः । ज्योतिर्नाटकनीतिलक्षणधनुर्वेदादिशास्त्रैः परे ब्रूमः प्रेत्यहिते तु कर्मणि जडान् कुक्षिंभरीनेव तान् ॥४॥ किं मोदसे पंडितनाममात्रात्, शास्त्रेष्वधीती जनरंजकेषु । तत्किंचनाधीष्व कुरुष्व चाशु, न ते

भवेद्येन भवाब्धिपातः ॥५॥ धिगागमैर्माद्यसि रंजयन् जनान्, नोद्यच्छसि प्रेत्यहिताय संयमे। दधासि कुक्षिंभरिमात्रतां मुने, क्व ते क्व तत् क्वैष च ते भवांतरे ॥६॥ धन्याः केऽप्यनधीतिनोपि सदनुष्ठानेषु बद्धादरा, दुःसाध्येषु परोपदेशलवतः श्रद्धानशुद्धाशयाः। केचित्त्वागमपाठिनोऽपि दधतस्तत्पुस्तकान् येऽलसाः अत्रामुत्रहितेषु कर्मसु कथं ते भाविन प्रेत्यहाः ॥७॥ धन्य स मुग्धमतिरप्युदितार्हदाज्ञारागेण यः सृजति पुण्यमदुर्विकल्पः। पाठेन किं व्यसनतोऽस्य तु दुर्विकल्पैर्यो दुःस्थितोऽत्र सदनुष्ठितिषु प्रमादी ॥८॥ अधीतिमात्रेण फलंति नागमाः, समीहितैर्जीव सुखैर्भवान्तरे। स्वनुष्ठितैः किंतु तदीरितैः खरो, न यत्सिताया वहनश्रमात्सुखी ॥९॥ दुर्गंधतो यदणुतोऽपि पुरस्य मृत्युरायूंषि सागरमितान्यनुपक्रमाणि। स्पर्शः खरः क्रकचतोऽतितमामितश्च, दुःखावनंतगुणितौ भृशशैत्यतापौ ॥१०॥ तीव्रा व्यथाः सुरकृता विविधाश्च यत्राक्रंदारवैः सततमभ्रभृतोऽप्यमुष्मात्। किं भाविनो न नरकात्कुमते बिभेषि, यन्मोदसे क्षणसुखैर्विषयैः

कषायी ॥११॥ युग्मम् ॥ बंधोऽनिशं वाहनताडनानि क्षुत्तृड्दुरामातपशीतवाताः । निजान्यजातीयभयापमृत्युदुःखानि तिर्यक्ष्विति दुस्सहानि ॥१२॥ मुधान्यदास्याभिभवाभ्यसूया भियोऽन्तगर्भस्थितिदुर्गतीनाम्। एवं सुरेष्वप्यसुखानि नित्यं, किं तत्सुखैर्वा परिणामदुखैः ॥१३॥ सप्तभीत्यभीभवेष्टविप्लवानिष्टयोगगदद्दुःसुतादिभिः । स्याच्चिरं विरसता नृजन्मनः, पुण्यतः सरसतां तदानय ॥१४॥ इति चतुर्गतिदुःखततीः कृतिन्नतिभयास्त्वमनंतमनेहसम् । हृदि विभाव्य जिनोक्तकृतांततः कुरु तथा न यथा स्युरिमास्तव ॥१५॥ आत्मन परस्त्वमसि साहसिकः श्रुताक्षैर्यद्भाविनं चिरचतुर्गतिदुःखराशिम् । पश्यन्नपीह न बिभेषि ततो न तस्य, विच्छित्तये च यतसे विपरीतकारी ॥१६॥ १०७ ॥

। अथ नवमश्चित्तदमनाधिकारः ।

कुकर्मजालैः कुविकल्पसूत्रजैर्निबध्य गाढं नरकाग्निभिश्चिरम् । विसारवत् पक्ष्यति जीव ! हे मनः कैवर्तकस्त्वामिति मास्य विश्वसी. ॥ १ ॥ चेतोऽर्थये मयि चिरत्नसखे ! प्रसीद, किं दुर्विकल्पनिकरैः

क्षिपसे भवे माम् । बद्धोऽजलिः कुरु कृपां भज सद्वि-
कल्पान्, मैत्रीं कृतार्थय यतो नरकाद्विभेमि ॥ २ ॥
स्वर्गापवर्गौ नरकं तथान्तर्मुहूर्तमात्रेण वशावशं यत् ।
ददाति जन्तोः सततं प्रयत्नात्, वशं तदंतःकरणं
कुरुष्व ॥ ३ ॥ सुखाय दुःखाय च नैव देवा, न
चापि कालः सुहृदोऽरयो वा । भवेत्परं मानसमेव
जंतोः, संसारचक्रभ्रमणैकहेतुः ॥ ४ ॥ वशं मनो
यस्य समाहितं स्यात्, किं तस्य कार्यं नियमैर्य-
मैश्च ? । हतं मनो यस्य च दुर्विकल्पैः किं तस्य
कार्यं नियमैर्यमैश्च ? ॥५॥ दानश्रुतध्यानतपोऽर्चनादि,
वृथा मनोनिग्रहमंतरेण । कषायचिंताकुलतोज्झितस्य,
परो हि योगो मनसो वशत्वम् ॥ ६ ॥ जपो न
मुक्त्यै न तपो द्विभेदं, न संयमो नापि दमो न
मौनम् । न साधनाद्यं पवनादिकस्य, किंत्वेकमंतः
करणं सुदान्तम् ॥७॥ लब्ध्वापि धर्मं सकलं जिनोदितं,
सुदुर्लभं पोतनिभं विहाय च । मनःपिशाचग्रहिलीकृतः
पतन्, भवांबुधौ नायतिदृग् जडो जनः ॥ ८ ॥
सुदुर्जयं ही रिपवत्यदो मनो, रिपूकरोत्येव च वाक्तनू
अपि । त्रिभिर्हतस्तद्रिपुभिः करोतु किं, पदीभवन्


www.jaintatvagyanshala.org

दुर्विपदां पदे पदे ॥ ९ ॥ रे चित्त ! वैरि ! तव किं नु मयापराद्धं, यद्दुर्गतौ क्षिपसि मां कुविकल्पजालैः । जानासि मामयमपास्य शिवेऽस्ति गंता तत्किं न सन्ति तव वासपदं ह्यसंख्याः ॥ १० ॥ पूतिश्रुतिः श्वव रतेर्विदूरे, कुष्टीव संपत्सुदृशामनर्हः । श्वपाकवत्सद्गतिमंदिरेषु, नार्हेत्प्रवेशं कुमनोहतोऽङ्गी ॥ ११ ॥ तपोजपाद्याः स्वफलाय धर्मा, न दुर्विकल्पैर्हतचेतसः स्युः । तत्खाद्यपेयैः सुभृतेऽपि गेहे, क्षुधातृषाभ्यां म्रियते स्वदोषात् ॥ १२ ॥ अकृच्छ्रसाध्यं मनसो वशीकृतात्, परं च पुण्यं, न तु यस्य तद्वशम् । स वंचितः पुण्यचयैस्तदुद्भवैः, फलैश्च ही ! ही ! हतकः करोतु किम् ? ॥ १३ ॥ अकारणं यस्य च दुर्विकल्पैर्हतं मनः शास्त्रविदोऽपि नित्यम् घोरैरघैर्निश्चितनारकायुर्मृत्यौ प्रयाता नरके स नूनम् ॥ १४ ॥ योगस्य हेतुर्मनसः समाधिः, परं निदानं तपसश्च योगः । तपश्च मूलं शिवशर्मवल्या, मनःसमाधिं भज तत्कथंचित् ॥ १५ ॥ स्वाध्याययोगैश्चरणक्रियासु, व्यापारणैर्द्वादशभावनाभिः । सुधीस्त्रियोगीसदसत्प्रवृत्तिफलोपयोगैश्च मनो निरुंध्यात् ॥ १६ ॥ भावना-

परिणामेषु, सिंहेष्विव मनोवने सदा जाग्रत्सु दुर्ध्यानसूकरा न विशंत्यपि ॥ १७ ॥ १२४ ॥

। अथ दशमो वैराग्योपदेशाधिकारः ।

किं जीव माद्यसि हसस्ययमीहसेऽर्थान्, कामांश्च खेलसि तथा कुतुकैरशंकः । चिक्षिप्सु घोरनरकावट कोटरे त्वामभ्यपतल्लघु विभावय मृत्युरक्षः ॥ १ ॥ आलंबनं तव लवादिकुठारघाताः छिंदंति जीविततरुं न हि यावदात्मन् । तावद्यतस्व परिणामहिताय तस्मिन्, छिन्ने हि कः क च कथं भविता स्वतंत्रः ॥२॥ त्वमेव मोग्धा मतिमान् त्वमात्मन् नेष्टाप्यनेष्टा सुखदुःखयोस्त्वम् । दाता च भोक्ता च तयोस्त्वमेव, तच्चेष्टसे किं ? न यथा हिताप्तिः ॥ ३ ॥ कस्ते निरंजन ! चिरं जनरंजनेन, धीमन् ! गुणोऽस्ति परमार्थदृशेति पश्य। तं रंजयाशु, विशदैश्चरितैर्भवाब्धौ, यस्त्वां पतंतमबलं परिपातुमीष्टे ॥ ४ ॥ विद्वानहं सकललब्धिरहं नृपोऽहं, दाताहमद्भुतगुणोऽहमहं गरीयान् । इत्याद्यहंकृतिवशात्परितोषमेषि, नो वेत्सि किं परभवे लघुतां भवित्रीम् ॥ ५ ॥ वेत्सि स्वरूपफलसाधनबाधनानि, धर्मस्य, तं प्रभवसि स्व-

वशश्च कर्तुम् तस्मिन् यतस्व मत्तिमन्नधुनेत्यमुत्र,
किंचित्त्वया हि नहि सेत्स्यति भोत्स्यते वा ॥ ६ ॥
धर्मस्याऽवसरोऽस्ति पुद्गलपरावर्तैरनंतैस्तवाऽऽयातः
संप्रति जीव हे प्रसहतो दुःखान्यनंतान्ययम् । स्वल्पाहः
पुनरेष दुर्लभतमश्चास्मिन् यतस्वार्हतो, धर्मं कर्तुमिमं
विना हि नहि ते दुःखक्षयः कर्हिचित् ॥ ७ ॥
गुणस्तुतीर्वांछसि निर्गुणोऽपि, सुखप्रतिष्ठादि विनापि
पुण्यम् । अष्टांगयोगं च विनापि सिद्धीर्वातूलता
कापि नवा तवात्मन् ॥ ८ ॥ पदे पदे जीव ! परा-
भिभूतिः, पश्यन् किमीर्ष्यस्यधमः परेभ्यः । अपुण्य-
मात्मानमवैषि किं न, तनोपि किं वा नहि पुण्यमेव
॥ ९ ॥ किमर्दयन्निर्दयमंगिनो लघून्, विचेष्टसे
कर्मसु ही प्रमादतः । यदेकशोऽप्यन्यकृतार्दनः सहत्य-
नंतशोऽप्यंग्ययमर्दनं भवे ॥ १० ॥ यथा सर्पमुख-
स्थोऽपि, भेको जंतूनि भक्षयेत् । तथा मृत्युमुखस्थोऽपि,
किमात्मन्नर्दसेऽगिनः ॥ ११ ॥ आत्मानमल्पैरिह
वंचयित्वा, प्रकल्पितैर्वा तनुचित्तसौख्यैः । भवाधमे
किं जन ! सागराणि, सोढासि ही नारकदुःख-
राशीन् ॥ १२ ॥ उरभ्रकाकिण्युदबिंदुकाम्रवणिक्त्रयी-

Aacharya vijay shri Surendrasuriswarji Jain Tatvagyanshala


शाकटमिक्षुकाद्यैः । निदर्शनैर्हारितमर्त्यजन्मा, दुखी प्रमादैर्बहु शोचितासि ॥ १३ ॥ पतंगभृंगैणखगाहि-मीनद्विपद्विपारिप्रमुखाः प्रमादैः । शोच्या यथा स्युर्मृतिबंधदुःखैश्चिराय भावी त्वमपीति जंतो ! ॥१४॥ पुरापि पापैः पतितोऽसि दुःखराशौ पुनर्मूढ ! करोषि तानि । मज्जन्महापंकिलवारिपूरे, शिला निजे मूर्ध्नि गले च धत्से ॥ १५ ॥ पुनः पुनर्जीव ! तवोपदिश्यते, बिभेषि दुःखात्सुखमीहसे चेत् । कुरुष्व तत्किंचन येन वांछितं, भवेत्तवास्तेऽवसरोऽयमेव यत् ॥ १६ ॥ धनांगसौख्यस्वजनानसूनपि, त्यज त्यजैकं न च धर्ममार्हतम् । भवन्ति धर्माद्धि भवे भवेऽर्थितान्य-मून्यमीभिः पुनरेष दुर्लभः ॥ १७ ॥ दुखं यथा बहुविधं सहसेऽप्यकामः, कामं तथा सहसि चेत्करु-णादिभावैः । अल्पीयसापि तव तेन भवांतरे स्यादा-त्यंतिकी सकलदुःखनिवृत्तिरेव ॥ १८ ॥ प्रगल्भसे कर्मसु पापकेष्वरे, यदाशया शर्म न तद्विनानितम् । विभावयंस्तच्च विनश्वरं द्रुतं, बिभेषि किं दुर्गति-दुःखतो नहि ? ॥ १९ ॥ कर्माणि रे जीव ! करोषि तानि, यैस्ते भवित्र्यो विपदो ह्यनंताः । ताभ्यो भिया तद्दधसेऽधुना किं ?, संभावितात्भ्योऽपि भृशा-

www.jaintatvagyanshala.org

कुलत्वम् ॥२०॥ ये पालिता वृद्धिमिताः सहैव, स्निग्धा भृशं स्नेहपदं च ये ते । यमेन तानप्यदयं गृहीतान्, ज्ञात्वापि किं न त्वरसे हिताय ? ॥२१॥ यैः क्लिश्यसे त्वं धनबंधुपत्ययशःप्रभुत्वादिभिराशयस्थैः । कियानिह प्रेत्य च तैर्गुणस्ते, साध्यः किमायुश्च विचारयैवम् ॥ २२ ॥ किमु मुह्यसि गत्वरैः पृथक्, कृपणैर्बंधुवपुःपरिग्रहैः । विमृशस्व हितोपयोगिनोऽवसरेऽस्मिन् परलोकपांथ ! रे ॥ २३ ॥ सुखमास्से सुखं शेषे, भुंक्षे पिबसि खेलसि । न जाने त्वग्रतः पुण्यैर्विना ते किं भविष्यति ? ॥ २४ ॥ शीतात्तापान्मक्षिकाकत्तृणादिस्पर्शाद्युत्थात्कष्टतोऽल्पाद्बिभेषि । तास्ताश्चैभिः कर्मभिः स्वीकरोषि, श्वभ्रादीनां वेदना धिग धियं ते ॥२५॥ क्वचित्कषायैः क्वचन प्रमादैः, कदाग्रहैः क्वापि च मत्सराद्यैः । आत्मानमात्मन् कलुषीकरोषि, बिभेषि धिङ्नो नरकादधर्मा ॥ २६ ॥ ॥ १५० ॥

। अथैकादशो धर्मशुद्ध्युपदेशाधिकारः ।

भवेद्भवापायविनाशनाय यः, तमज्ञ ! धर्मं कलुषीकरोषि किम् ? । प्रमादमानोपधिमत्सरादिभिर्न

Aacharya vijay shri Surendrasuriswarji Jain Tatvagyanshala


मिश्रितं ह्यौषधमामयापहम् ॥१॥ शैथिल्यमात्सर्य-
कदाग्रहक्रुधोऽनुतापदंभाविधिगौरवाणि च । प्रमाद-
मानौ कुगुरुः कुसंगतिः, श्लाघार्थिता वा सुकृते मला
इमे ॥२॥ यथा तवेष्टा स्वगुणप्रशंसा, तथा परेषामिति
मत्सरोज्झी । तेषामिमां संतनु यल्लभेथास्तां नेष्ट-
दानादि (द्धि ?) विनेष्टलाभः ॥३॥ जनेषु गृह्णत्सु
गुणान् प्रमोदसे, ततो भवित्री गुणरिक्तता तव ।
गृह्णत्सु दोषान् परितप्यसे च चेद्, भवन्तु दोषा-
स्त्वयि सुस्थिरास्ततः ॥४॥ प्रमोदसे स्वस्य यथा-
न्यनिर्मितैः, स्तवैस्तथा चेत्प्रतिपंथिनामपि। विगर्हणैः
स्वस्य यथोपतप्यसे, तथा रिपूणामपि चेत्ततोऽसि
वित् ॥५॥ स्तवैर्यथा स्वस्य विगर्हणैश्च, प्रमोदतापौ
भजसे तथा चेत् । इमौ परेषामपि तैश्चतुर्ष्वप्युदासतां
वासि ततोऽर्थवेदी ॥६॥ भवेन्न कोऽपि स्तुतिमात्रतो
गुणी, ख्यात्या न वह्व्यापि हितं परत्र च ।
तदिच्छुरीर्ष्यादिभिरायतिं ततो, मुधाभिमानग्रहिलो
निहंसि किम् ॥७॥ सृजन्ति के के न बहिर्मुखा
जनाः प्रमादमात्सर्यकुबोधविप्लुताः । दानादिधर्माणि
मलीमसान्यमून्युपेक्ष्य शुद्धं सुकृतं चराऽण्वपि ॥८॥

www.jaintatvagyanshala.org

आच्छादितानि सुकृतानि यथा दधंते, सौभाग्यमत्र न तथा प्रकटीकृतानि । व्रीडानताननसरोजसरोज-नेत्रावक्षःस्थलानि कलितानि यथा दुकूलैः ॥ ९ ॥ स्तुतैः श्रुतैर्वाप्यपरैर्निरीक्षितैर्गुणस्तवात्मन् ! सुकृतैर्न कश्चन । फलन्ति नैव प्रकटीकृतैर्भुवो, द्रुमा हि मूलैर्निपतंत्यपि त्वधः ॥१०॥ तपःक्रियावश्यकदान-पूजनैः, शिवं न गंता गुणमत्सरी जनः । अपथ्यभोजी न निरामयो भवेद्रसायनैरप्यतुलैर्यदातुरः ॥ ११ ॥ मन्त्रप्रभारत्नरसायनादिनिदर्शनादल्पमपीह शुद्धम् । दानार्चनावश्यकपौषधादि, महाफलं पुण्यमितोऽन्यथा-न्यत् ॥ १२ ॥ दीपो यथाल्पोऽपि तमांसि हन्ति, लवोऽपि रोगान् हरते सुधायाः । तृण्यां दहत्याशु कणोऽपि चाग्नेर्धर्मस्य लेशोऽप्यमलस्तथांहः ॥१३॥ भावोपयोगशून्याः, कुर्वन्नावश्यकीः क्रियाः सर्वाः देहक्लेशं लभसे, फलमाप्स्यसि नैव पुनरासाम् ॥ १४ ॥ ॥ १६४ ॥

। अथ द्वादशो देवगुरुधर्मशुद्ध्यधिकारः ।

तत्त्वेषु सर्वेषु गुरुः प्रधानं, हितार्थधर्मा हि तदुक्तिसाध्याः । श्रयंस्तमेवेत्यपरीक्ष्य मूढ !, धर्म-

प्रयासान् कुरुषे वृथैव ॥ १ ॥ भवी न धर्मैरविधि-
प्रयुक्तैर्गमी शीघ्रं येषु गुरुर्न शुद्धः । रोगी हि कल्यो
न रसायनैस्तैर्येषां प्रयोक्ता भिषगेव मूढः ॥ २ ॥
समाश्रितस्तारकबुद्धितो यो, यस्यास्त्यहो मज्जयिता
स एव । ओघं तरीता विषमं कथं स, तथैव जंतु
कुगुरोर्भवाब्धिम् ॥ ३ ॥ गजाश्वपोतोक्षरथान् यथेष्ट-
पदाप्तये भद्र ! निजान् परान् वा । भजंति विज्ञाः
सुगुणान् भजैवं, शिवाय शुद्धान् गुरुदेवधर्मान् ॥४॥
फलाद् वृथा स्युः कुगुरुपदेशतः, कृता हि धर्मार्थम-
पीह सूद्यमाः । तद्दृष्टिरागं परिमुच्य भद्र ! हे,
गुरुं विशुद्धं भज चेद्धितार्थ्यसि ॥ ५ ॥ न्यस्ता
मुक्तिपथस्य वाहकतया श्रीवीर ! ये प्राक् त्वया,
लुंटाकास्त्वदृतेऽभवन् बहुतरास्त्वच्छासने ते कलौ ।
बिभ्राणा यतिनाम तत्तनुधियां मुष्णंति पुण्यश्रियः,
पूत्कुर्मः किमराज्यके ह्यपि तलारक्षा न किं दस्यवः ?
॥६॥ माद्यस्यशुद्धैर्गुरुदेवधर्मैर्धिग् दृष्टिरागेण गुणान-
पेक्षः । अमुत्र शोचिष्यसि तत्फले तु, कुपथ्यभो-
जीव महामयार्त्तः ॥७॥ नाम्रं सुसिक्तोऽपि ददाति
निंबकः, पुष्टा रसैर्वंध्यगवी पयो न च । दुःस्थो

नृपो नैव सुसेवितः श्रियं, धर्मं शिवं वा कुगुरुर्न
संश्रितः ॥८॥ कुलं न जातिः पितरौ गणो वा,
विद्या च बंधुः स्वगुरुर्धनं वा। हिताय जंतोर्न परं
च किंचित्, किंत्वादृताः सद्गुरुदेवधर्माः ॥९॥
माता पिता स्वः सुगुरुश्च तत्त्वात्, प्रबोध्य यो
योजति शुद्धधर्मे। न तत्समोऽरिः क्षिपते भवाब्धौ,
यो धर्मविघ्नादिकृतेश्च जीवम् ॥१०॥ दाक्षिण्यलज्जे
गुरुदेवपूजा, पित्रादिभक्तिः सुकृताभिलाषः। परोप-
कारव्यवहारशुद्धी, नृणामिहामुत्र च संपदे स्युः ॥११॥
जिनेष्वभक्तिर्यतिनामवज्ञा, कर्मस्वनौचित्यमधर्मसंगः।
पित्राद्युपेक्षा परवंचनञ्च, सृजन्ति पुंसां विपदः
समन्तात् ॥१२॥ भक्त्यैव नार्चसि जिनं सुगुरोश्च
धर्मं, नाकर्णयस्यविरतं विरतीर्न धत्से। सार्थं निरर्थ-
मपि च प्रचिनोष्यघानि, मूल्येन केन तदमुत्र समीहसे
शम्? ॥१३॥ चतुष्पदैः सिंह इव स्वजात्यैर्मिलन्नि-
मांस्तारयतीह कश्चित्। सहैव तैर्मज्जति कोऽपि दुर्गे,
शृगालवच्चेत्यमिलन् वरं सः ॥ १४ ॥ पूर्णे तटाके
तृषितः सदैव, भृतेऽपि गेहे क्षुधितः स मूढः।
कल्पद्रुमे सत्यपि ही दरिद्रो, गुर्वादियोगेऽपि हि

Aacharya vijay shri Surendrasuriswarji Jain Tatvagyanshala


यः प्रमादी ॥१५॥ न धर्मचिंता गुरुदेवभक्तिर्येषां न वैराग्यलवोऽपि चित्ते । तेषां प्रसूक्लेशफलः पशूनामिवोद्भवः स्यादुदरंभरीणाम् ॥१६॥ न देवकार्ये न च संघकार्ये येषां धनं नश्वरमाशु तेषाम् । तदर्जनाद्यैर्वृजिनैर्भवांधौ, पतिष्यतां किं त्ववलंबनं स्यात् ? ॥१७॥ ॥१८१॥

। अथ त्रयोदशो यतिशिक्षोपदेशाधिकारः ।

ते तीर्णा भववारिधिं मुनिवरास्तेभ्यो नमस्कुर्महे, येषां नो विषयेषु गृध्यति मनो नो वा कषायैः प्लुतम् । रागद्वेषविमुक्तप्रशांतकलुषं साम्याप्तशर्माद्वयं, नित्यं खेलति चात्मसंयमगुणाक्रीडे भजद्भावनाः ॥१॥ स्वाध्यायमाधित्ससि नो प्रमादैः, शुद्धा न गुप्तीः समितिश्च धत्से । तपो द्विधा नार्जसि देहमोहादल्पेऽपि हेतौ दधसे कषायान् ॥ २ ॥ परीषहान्नो सहसे न चोपसर्गान्न शीलांगधरोऽपि चासि । तन्मोक्ष्यमाणोऽपि भवाब्धिपारं, मुने ! कथं यास्यसि वेषमात्रात् ॥३॥ युग्मम् ॥ आजीविकार्थमिह यद्यतिवेषमेष, धत्से चरित्रममलं न तु कष्टभीरुः । तद्वेत्सि किन्न ? न बिभेति जगज्जिघृक्षुर्मृत्युः कुतोऽपि नरकश्च

www.jaintatvagyanshala.org

न बेषमात्रात् ॥४॥ वेषेण माद्यसि यतेश्चरणं विनात्मन् !, पूजां च वांछसि जनाद्बहुधोपधिं च। मुग्धप्रतारणभवे नरकेऽस्मि गंता, न्यायं बिभर्षि तदजागलकर्तरीयम् ॥५॥ जानेऽस्ति संयमतपोभिरमीभिरात्मन्नस्य प्रतिग्रहभरस्य न निष्क्रयोऽपि । किं दुर्गतौ निपततः शरणं तवास्ते ?, सौख्यं च दास्यति परत्र किमित्यवेहि ॥ ६ ॥ किं लोकसत्कृतिनमस्करणार्चनाद्यै, रे मुग्ध तुष्यसि विनापि विशुद्धयोगान् । कृंतन् भवांधुपतने तवयत्प्रमादो, बोधिद्रुमाश्रयमिमानि करोति पर्शून् ॥७॥ गुणांस्तवाश्रित्य नमंत्यमी जना, ददत्युपध्यालयभैक्ष्यशिष्यकान् । विना गुणान् वेषमृषेर्बिभर्षि चेत्, ततष्ठकानां तव भाविनी गतिः ॥८॥ नाजीविकाप्रणयिनीतनयादिचिन्ता, नो राजभीश्च भगवत्समयं च वेत्सि । शुद्धे तथापि चरणे यतसे न भिक्षो !, तत्ते परिग्रहभरो नरकार्थमेव ॥९॥ शास्त्रज्ञोऽपि धृतव्रतोऽपि गृहिणीपुत्रादिबंधोज्झितोऽप्यंगी यद्यतते प्रमादवशगो न प्रेत्यसौख्यश्रिये । तन्मोहद्विषतस्त्रिलोकजयिनः काचित्परा दुष्टता, बद्धायुष्कतया स वा नरपशुर्नूनं गमी दुर्गतौ

॥ १० ॥ उच्चारयस्यनुदिनं न करोमि सर्वं सावद्य-
मित्यसकृदेतदथो करोषि। नित्यं मृषोक्तिजिनवंच-
नभारितात्तत्, सावद्यतो नरकमेव विभावये ते
॥ ११ ॥ वेषोपदेशाद्युपधिप्रतारिता ददत्यभीष्टानृज-
वोऽधुना जनाः। भुंक्षे च शेषे च सुखं विचेष्टसे,
भवांतरे ज्ञास्यसि तत्फलं पुनः ॥ १२ ॥ आजी-
विकादिविविधार्त्तिभृशानिशार्त्ताः, कृच्छ्रेण केऽपि
महतैव सृजन्ति धर्मान्। तेभ्योऽपि निर्दय। जिघृ-
क्षसि सर्वमिष्टं नो संयमे च यतसे भविता कथं
ही ॥ १३ ॥ आराधितो वा गुणवान् स्वयं तरन्,
भवाब्धिमस्मानपि तारयिष्यति। श्रयन्ति ये त्वामिति
भूरिभक्तिभिः, फलंतवैषां च किमस्ति निर्गुण!
॥ १४ ॥ स्वयं प्रमादैर्निपतन् भवांबुधौ, कथं स्व-
भक्तानपि तारयिष्यसि?। प्रतारयन् स्वार्थमृजून्
शिवार्थिनः, स्वतोऽन्यनश्चैव विलुप्यसेऽहसा ॥१५॥
गृह्णासि शय्याहृतिपुस्तकोपधीन्, सदा परेभ्यस्त-
पसस्त्वियं स्थितिः। तत्ते प्रमादाद्भरितात्प्रतिग्रहे-
ऋणार्णमग्नस्य परत्र का गतिः? ॥१६॥ न कापि
सिद्धिर्न च तेऽतिशायि, मुने! क्रियायोगतपः

Aacharya vijay shri Surendrasuriswarji Jain.Tatvagyanshala


श्रुतादि। तथाप्यहंकारकदर्थितस्त्वं, ख्यातीच्छया ताम्यसि धिङ्मुधा किम्? ॥ १७ ॥ हीनोऽप्यरे भाग्यगुणैर्मुधात्मन्, वांछंस्तवार्चाद्यनवाप्नुवंश्च ईर्ष्यन् परेभ्यो लभसेऽतितापमिहापि. याता कुगतिं परत्र ॥ १८ ॥ गुणैर्विहीनोऽपि जनानतिस्तुतिप्रतिग्रहान् यन्मुदितः प्रतीच्छसि। लुलायगोऽश्वोष्ट्रखरादिजन्मभिर्विना, ततस्ते भविता न निष्क्रयः ॥१९॥ गुणेषु नोद्यच्छसि चेन्मुने! ततः, प्रगीयसे यैरपि वंद्यसेऽर्च्यसे। जुगुप्सितां प्रेत्य गतिं गतोऽपि तैर्हसिष्यसे चाभिभविष्यसेऽपि वा ॥२०॥ दानमाननुतिवंदनापरैर्मोदसे, निकृतिरंजितैर्जनैः। न त्ववैषि सुकृतस्य चेल्लवः, कोऽपि सोऽपि तव लुंट्यते हि तैः ॥२१॥ भवेद् गुणी मुग्धकृतैर्न हि स्तवैर्न ख्यातिदानार्चनवंदनादिभिः। विना गुणान्नो भवदुःखसंक्षयस्ततो गुणानर्जय किं स्तवादिभिः ॥ २२ ॥ अध्येषि शास्त्रं सदसद्विचित्रालापादिभिस्ताम्यसि वा समायैः। येषां जनानामिह रंजनाय, भवांतरे ते क्व मुने! क्व च त्वम् ॥ २३ ॥ परिग्रहं चेद्व्यजहा गृहादेस्तत्किं नु धर्मोपकृतिच्छलात्तम्। करोषि शय्योपधिपुस्तकादेर्गं-

www.jaintatvagyanshala.org

रोऽपि नामांतरतोऽपि हंता ॥२४॥ परिग्रहात्स्वी-
कृतधर्मसाधनाभिधानमात्रात्किमु मूढ ! तुष्यसि । न
वेत्सि हेम्नाप्यतिभारितातरी, निमज्जयत्यंगिनमंबुधौ
द्रुतम् ॥२५॥ येऽहःकषायकलिकर्मनिबंधभाजनं, स्युः
पुस्तकादिभिरपीहितधर्मसाधनैः । तेषां रसायनवरै-
रपि सर्पदामयैरार्त्तात्मनां गदहृतेः सुखकृत्तु किं
भवेत् ॥२६॥ रक्षार्थं खलु संयमस्य गदिता येऽर्था
यतीनां जिनैर्वासः पुस्तकपात्रकप्रभृतयो धर्मोप-
कृत्यात्मकाः । मूर्छन्मोहवशात्त एव कुधियां संसार
पाताय धिक्, स्वं स्वस्यैव वधाय शस्त्रमधियां
यद्दुष्प्रयुक्तं भवेत् ॥ २७ ॥ संयमोपकरणच्छलात्परा-
न्भारयन् यदसि पुस्तकादिभिः । गोखरोष्ट्रमहिषादि-
रूपभृत्तच्चिरं त्वमपि भारयिष्यसे ॥२८॥ वस्त्रपात्र-
तनुपुस्तकादिनः, शोभया न खलु संयमस्य सा ।
आदिमा च ददते भवं परा, मुक्तिमाश्रय तदि-
च्छयैक्किकाम् ॥ २९ ॥ शीतातपाद्यान्न मनागपीह,
परीषहांश्चेत्क्षमसे विसोढुम् । कथं ततो नारकगर्भवा-
सदुःखानि, सोढासि भवांतरे त्वम् ? ॥३०॥ मुने !
न किं नश्वरमस्वदेहमृत्पिंडमेनं सुतपोव्रताद्यैः ।

निपीड्य भीतिर्भवदुःखराशेर्हित्वात्मसाच्छैवसुखं करोषि? ॥ ३१ ॥ यदत्र कष्टं चरणस्य पालने, परत्र तिर्यङ्नरकेषु यत्पुनः । तयोर्मिथः सप्रतिपक्षता स्थिताविशेषदृष्ट्यान्यतरद्‌जहीहि तत् ॥ ३२ ॥ शमत्र यद् बिन्दुरिव प्रमादजं, परत्र यच्चाब्धिरिव द्युमुक्तिजम् । तयोर्मिथः सप्रतिपक्षता स्थिता, विशेषदृष्ट्यान्यतरद् गृहाण तत् ॥ ३३ ॥ नियंत्रणा या चरणेऽत्र तिर्यक्स्त्रीगर्भकुंभीनरकेषु या च । तयोर्मिथः सप्रतिपक्षभावाद्विशेषदृष्ट्यान्यतरां गृहाण ॥३४॥ सह तपोयमसंयमयंत्रणां, स्ववशतासहने हि गुणो महान् । परवशस्त्वति भूरि सहिष्यसे, न च गुणं बहुमाप्स्यसि कंचन ॥३५॥ अणीयसा साम्यनियंत्रणाभुवा, मुनेऽत्र कष्टेन चरित्रजेन च । यदि क्षयो दुर्गतिगर्भवासगाऽसुखावलेस्तन्किमवापि नार्थितम् ? ॥३६॥ त्यज स्पृहां स्वःशिवशर्मलाभे, स्वीकृत्य तिर्यङ्नरकादिदुःखम् । सुखाणुभिश्चेद्विषयादिजातैः, संतोष्यसे संयमकष्टभीरुः ॥३७॥ समग्रचिन्तार्त्तिहृतेरिहापि, यस्मिन्सुखं स्यात्परमं रतानाम् । परत्र चेन्द्रादिमहोदयश्रीः, प्रमाद्यसीहापि कथं चरित्रे ! ॥३८॥

Aacharya vijay shri Surendrasuriswarji Jain Tatvagyanshala


महातपोध्यानपरीषहादि, न सत्त्वसाध्यं यदि धर्तु-मीशः । तद्भावनाः किं समितीश्च गुप्तीर्धत्से शिवार्थिन् न मनः प्रसाध्याः ॥ ३९ ॥ अनित्यताद्या भज भावनाः सदा, यतस्व दुःसाध्यगुणेऽपि संयमे । जिघृत्सया ते त्वरते ह्ययं यमः, (ह्यसंयमः?) श्रयन् प्रमादान्न भवाद्बिभेषि किम् ? ॥४०॥ हतं मनस्ते कुविकल्पजालैर्वचोऽप्यवद्यैश्च वपुः प्रमादैः । लब्धीश्च सिद्धीश्च तथापि वांछन्, मनोरथैरेव हहा ! ! हतोऽसि ॥४१॥ मनोवशस्ते सुखदुःखसंगमो, मनो मिलेद्यैस्तु तदात्मकं भवेत् । प्रमादचोरैरिति वार्यतां मिलच्छीलांगमित्रैरनुषञ्जयानिशम् ॥ ४२ ॥ ध्रुवः प्रमादैर्भववारिधौ मुने !, तव प्रपातः परमत्सरः पुनः । गले निबद्धोरुशिलोपमोऽस्ति चेत् कथं तदोन्मज्जन-मप्यवाप्स्यसि ? ॥ ४३ ॥ महर्षयः केऽपि सहन्त्यु-दीर्याप्युग्रातपादीन्यदि निर्जरार्थम् । कष्टं प्रसंगा-गतमप्यणीयोऽपीच्छन् शिवं किं सहसे न भिक्षो ! ॥४४॥ यो दानमानस्तुतिवंदनाभिर्न मोदतेऽन्यैर्न तु दुर्मनायते । अलाभलाभादिपरीषहान् सहन्, यतिः स तत्त्वादपरो विडंबकः ॥ ४५ ॥ दधद् गृहस्थेषु मम-


www.jaintatvagyanshala.org

त्वबुद्धिं, तदीयतप्त्या परितप्यमानः । अनिवृत्तांतः करणःसदा स्वैस्तेषां च पापैर्भ्रमिता भवेऽसि ॥ ४६ ॥

त्यक्त्वा गृहं स्वं परगेहचिंतातप्तस्य को नाम गुणस्तवर्षे ! । आजीविकास्ते यतिवेषतोऽत्र, सुदुर्गतिः प्रेत्य तु दुर्निवारा ॥ ४७ ॥ कुर्वे न सावद्यमिति प्रतिज्ञां, वदन्नकुर्वन्नपि देहमात्रात् । शय्यादिकृत्येषु नुदन् गृहस्थान्, हृदा गिरा वाऽसि कथं मुमुक्षुः ? ॥४८॥

कथं महत्त्वाय ममत्वतो वा, सावद्यमिच्छस्यपि संघलोके । न हेममय्यप्युदरे हि शस्त्री, क्षिप्ता क्षणोति क्षणतोऽप्यसून् किम् ? ॥ ४९ ॥ रंकः कोऽपि जनाभिभूतिपदवीं त्यक्त्वा प्रसादाद्गुरोर्वेषं प्राप्य यतेः कथंचन कियच्छास्त्रं पदं कोऽपि च । मौखर्यादिवशीकृतर्जुजनतादानार्चनैर्गर्वभा – गात्मानं गणयन्नरेंद्रमिव धिग् गंता द्रुतं दुर्गतौ ॥ ५० ॥ प्राप्यापि चारित्रमिदं दुरापं, स्वदोषजैर्यद्विषयप्रमादैः । भवांबुधौ धिक् पतितोऽसि भिक्षो ! ।, हतोऽसि दुःखैस्तदनंतकालम् ॥५१॥ कथमपि समवाप्य बोधिरत्नं, युगसमिलादिनिदर्शनाद्दुरापम् । कुरु कुरु रिपुवश्यतामगच्छन्, किमपि हितं लभसे यतोऽर्थितं शम् ॥५२॥

द्विषस्त्विमे ते विषयप्रमादा, असंवृता मानसदेहवाचः।
असंयमाः सप्तदशापि हास्यादयश्च बिभ्यच्चर नित्य-
मेभ्यः ॥ ५३ ॥ गुरूनवाप्याप्यपहाय गेहमधीत्य
शास्त्राण्यपि तत्त्ववांचि । निर्वाहचिंतादिभराद्यभावे-
ऽप्यृषे ! न किं प्रेत्यहिताय यत्नः ? ॥ ५४ ॥
विराधितैः संयमसर्वयोगैः, पतिष्यतस्ते भवदुःखराशौ।
शास्त्राणि शिष्योपधिपुस्तकाद्या, भक्ताश्च लोकाः
शरणाय नालम् ॥ ५५ ॥ यस्य क्षणोऽपि सुरधाम-
सुखानि पल्य–कोटीर्नृणां द्विनवतीं ह्यधिकां ददाति।
किं हारयस्यधम ! संयमजीवितं तत्, हा हा प्रमत्त !
पुनरस्य कुतस्तवाप्तिः ? ॥ ५६ ॥ नाम्नापि यस्येति
जनेऽसि पूज्यः, शुद्धात्ततो नेष्टसुखानि कानि ।
तत्संयमेऽस्मिन् यतसे मुमुक्षोऽनुभूयमानोरुफलेऽपि
किं न ? ॥ ५७ ॥ २३८ ॥

। अथ चतुर्दशो मिथ्यात्वादिनिरोधाधिकारः ।

मिथ्यात्वयोगाविरतिप्रमादान्, आत्मन् ! सदा
संवृणु सौख्यमिच्छन् । असंवृत्ता यद्भवतापमेते,
सुसंवृता मुक्तिरमां च दद्युः ॥ १ ॥ मनः संवृणु
हे विद्वन् !, असंवृतमना यतः । याति तंदुलमत्स्यो

द्राक्, सप्तमीं नरकावनीम् ॥ २ ॥ प्रसन्नचंद्रराजर्षे-
र्मनःप्रसरसंवरौ । नरकस्य शिवस्यापि, हेतुभूतौ
क्षणादपि ॥ ३ ॥ मनोऽप्रवृत्तिमात्रेण, ध्यानं नैके-
न्द्रियादिषु । धर्म्यशुक्लमनःस्थैर्यभाजस्तु ध्यायिनः
स्तुमः ॥ ४ ॥ सार्थं निरर्थकं वा यन्-मनः सुध्या-
नयंत्रितम् । विरतं दुर्विकल्पेभ्यः, पारगांस्तान्
स्तुवे यतीन् ॥ ५ ॥ वचोऽप्रवृत्तिमात्रेण, मौनं
के के न बिभ्रति । निरवद्यं वचो येषाम्,
वचोगुप्तांस्तु तान् स्तुवे ॥ ६ ॥ निरवद्यं
वचो ब्रूहि, सावद्यवचनैर्यतः । प्रयाता नरकं
घोरं, वसुराजादयो द्रुतम् ॥ ७ ॥ इहाऽमुत्र च
वैराय, दुर्वाचो नरकाय च । अग्निदग्धाः प्ररोहन्ति,
दुर्वाग्दग्धाः पुन र्न हि ॥ ८ ॥ अत एव जिना
दीक्षाकालादाकेवलोद्भवम् । अवद्यादिभिया ब्रयुर्ज्ञान-
त्रयभृतोऽपि न ॥ ९ ॥ कृपया संवृणु स्वांगं, कूर्म-
ज्ञातनिदर्शनात् । संवृतासंवृतांगा यत्, सुखदुःखान्य-
वाप्नुयुः ॥१०॥ कायस्तंभान्न के के स्युस्तरुस्तं-
भादयो यताः । शिवहेतुक्रियो येषां, कायस्तांस्तु
स्तुवे यतीन् ॥ ११ ॥ श्रुतिसंयममात्रेण, शब्दान्

Aacharya vijay shri Surendrasuriswarji Jain Tatvagyanshala


कान् के त्यजन्ति न। इष्टानिष्टेषु चैतेषु, रागद्वेषौ त्यजन्मुनिः ॥ १२ ॥ चक्षुःसंयममात्रात् के, रूपालोकांस्त्यजन्ति न। इष्टानिष्टेषु चैतेषु, रागद्वेषौ त्यजन्मुनिः ॥ १३ ॥ घ्राणसंयममात्रेण, गंधान् कान् के त्यजन्ति न। इष्टानिष्टेषु चैतेषु, रागद्वेषौ त्यजन् मुनिः ॥ १४ ॥ जिह्वासंयममात्रेण, रसान् कान् के त्यजन्ति न। मनसा त्यज तानिष्टान्, यदीच्छसि तपःफलम् ॥१५॥ त्वचः संयममात्रेण, स्पर्शान् कान् के त्यजन्ति न। मनसा त्यज तानिष्टान् यदीच्छसि तपःफलम् ॥ १६ ॥ वस्तिसंयममात्रेण, ब्रह्म के के न बिभ्रते। मनःसंयमतो धेहि, धीर! चेत्तत्फलार्थ्यसि ॥१७॥ विषयेंद्रियसंयोगाभावात्के के न संयताः। रागद्वेषमनोयोगाभावात्के तु स्तवीमि तान् ॥ १८ ॥ कषायान् संवृणु प्राज्ञ, नरकं यदसंवरात्। महातपस्विनोऽप्यापुः, करटोत्करटादयः ॥१९॥ यस्यास्ति किंचिन्न तपोयमादि, ब्रूयात्स यत्तत्तुदतां परान् वा। यस्यास्ति कष्टाप्तमिदं तु किं न, तद्भ्रंशभीः संवृणुते स योगान् ॥२०॥ भवेत्समग्रेष्वपि संवरेषु, परं निदानं शिव-

www.jaintatvagyanshala.org

Aacharya vijay shri Surendrasuriswarji Jain Tatvagyanshala


संपदां यः। त्यजन् कषायादिजदुर्विकल्पान्, कुर्यान्मनःसंवरमिद्धधीस्तम् ॥ २१ ॥ तदेवमात्मा कृतसंवरः स्यात्, निःसंगताभाक् सततं सुखेन। निःसंगभावादथ संवरस्तद्द्वयं शिवार्थी युगपद्व्रजेत ॥ २२ ॥ ॥ २६० ॥

---

। अथ पंचदशः शुभवृत्तिशिक्षोपदेशाधिकारः ।

आवश्यकेष्वातनु यत्नमाप्तोदितेषु शुद्धेषु तमोऽपहेषु । न हंत्यभुक्तं हि न चाप्यशुद्धं, वैद्योक्तमप्यौषधमामयान् यत् ॥ १ ॥ तपांसि तन्याद्द्विविधानि नित्यं, मुखे कटून्यायतिसुंदराणि । निघ्नन्ति तान्येव कुकर्मराशिं, रसायनानीवदुरामयान् यत् ॥२॥ विशुद्धशीलांगसहस्रधारी, भवानिशं निर्मितयोगसिद्धिः । सहोपसर्गांस्तनुनिर्ममः सन्, भजस्व गुप्तीः समितीश्च सम्यक् ॥३॥ स्वाध्याययोगेषु दधस्व यत्नं, मध्यस्थवृत्त्यानुसरागमार्थान् । अगारवो भैक्षमटाऽविषादो, हेतौ विशुद्धे वशितेंद्रियौघः ॥४॥ ददस्व धर्मार्थितयैव धर्म्यान्, सदोपदेशान् स्वपरादिसाम्यान् । जगद्धितैषी नवभिश्च कल्पैर्ग्रामे कुले वा विहराऽप्रमत्तः ॥५॥

www.jaintatvagyanshala.org

कृताकृतं स्वस्य तपोजपादि, शक्तीरशक्तीः सुकृतेतरे च। सदा समीक्षस्व हृदाथ साध्ये यतस्व हेयं त्यज चाव्ययार्थी ॥६॥ परस्य पीडापरिवर्जनात्ते, त्रिधा त्रियोग्यप्यमला सदास्तु। साम्यैकलीनं गतदुर्विकल्पं, मनोवचश्चाप्यनघप्रवृत्ति ॥ ७ ॥ मैत्रीं प्रमोदं करुणां च सम्यक्, मध्यस्थतां चानय साम्यमात्मन्। सद्भावनास्वात्मलयं प्रयत्नात्, कृताविरामं रमयस्व चेतः! ॥८॥ कुर्यान्न कुत्रापि ममत्वभावं, न च प्रभो! रत्यरती कषायान्। इहापि सौख्यं लभसेऽप्यनीहो, ह्यनुत्तरामर्त्यसुखाभमात्मन्! ॥९॥ इति यतिवरशिक्षां योऽवधार्य व्रतस्थ–श्चरणकरणयोगानेकचित्तः श्रयेत। सपदि भवमहाब्धि क्लेशराशिं स तीर्त्वा, विलसति शिवसौख्यानंत्यसायुज्यमाप्य ॥ १० ॥ ॥ २७० ॥

---

। अथ षोडशः साम्यसर्वस्वाधिकारः ।

एवं सदाभ्यासवशेन सात्म्यं, नयस्व साम्यं परमार्थवेदिन्! । यतः करस्थाः शिवसंपदस्ते, भवन्ति सद्यो भवभीतिभेत्तुः ॥ १ ॥ त्वमेव दुःखं नरकस्त्वमेव, त्वमेव शर्मापि शिवं त्वमेव। त्वमेव

Aacharya vijay shri Surendrasuriswarji Jain Tatvagyanshala


कर्माणि मनस्त्वमेव. जहीह्यविद्यामवधेहि चात्मन् ! ॥२॥ निःसंगतामेहि सदा तदात्मन्नर्थेष्वशेषेष्वपि साम्यभावात् । अवेहि विद्वन्! ममतैव मूलं शुचां सुखानां समतैव चेति ॥३॥ स्त्रीषु धूलिषु निजे च परे वा, संपदि प्रसरदापदि चात्मन्! तत्त्वमेहि समतां ममतामुग्, येन शाश्वतसुखाद्वयमेषि ॥४॥ तमेव सेवस्व गुरुं प्रयत्नादधीष्व, शास्त्राण्यपि तानि विद्वन्! । तदेव तत्त्वं परिभावयात्मन्!, येभ्यो भवेत्साम्यसुधोपभोगः॥५॥ समग्रसच्छास्त्रमहार्णवेभ्यः, समुद्धृतः साम्यसुधारसोऽयम् । निपीयतां हे विबुधा लभध्वमिहापि मुक्तेः सुखवर्णिकां यत् ॥६॥ शांतरसभावनात्मा, मुनिसुन्दरसूरिभिः कृतो ग्रंथः । ब्रह्मस्पृहया ध्येयः, स्वपरहितोऽध्यात्मकल्पतरुरेषः॥७॥ इममिति मतिमानधीत्य चित्ते, रमयति यो विरमत्ययं भवाद्राक् । स च नियतमतो रमेत चास्मिन्, सह भववैरिजयश्रिया शिवश्रीः ॥८॥ ॥२७८॥

इति सहस्रावधानिश्रीमुनिसुन्दरसूरिविरचितः
षोडशाधिकारात्मकोऽध्यात्मकल्पद्रुमः समाप्तः

---

www.jaintatvagyanshala.org

कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचितं

अयोगव्यवच्छेदिकाद्वात्रिंशिकाख्यं

# श्रीमहावीरस्वामिस्तोत्रम् ।

अगम्यमध्यात्मविदामवाच्यं वचस्विनामक्षवतां परोक्षम् । श्रीवर्धमानाभिधमात्मरूपमहं स्तुतेर्गोचर-मानयामि ॥१॥ स्तुतावशक्तिस्तव योगिनां न किं गुणानुरागस्तु ममापि निश्चलः । इदं विनिश्चित्य तव स्तवं वदन्न बालिशोऽप्येष जनोऽपराध्यति ॥२॥ क्व सिद्धसेनस्तुतयो महार्था अशिक्षितालापकला क्व चैषा । तथापि यूथाधिपतेः पथस्थः स्खलद्गतिस्तस्य शिशुर्न शोच्यः ॥३॥ जिनेन्द्र यानेव विबाधसे स्म दुरन्तदोषान् विविधैरुपायैः । त एव चित्रं त्वदसूययेव कृताः कृतार्थाः परतीर्थनाथैः ॥४॥ यथास्थितं वस्तु दिशन्नधीश न तादृशं कौशलमाश्रितोऽसि । तुरङ्ग-शृङ्गाण्युपपादयद्भ्यो नमः परेभ्यो नवपण्डितेभ्यः ॥५॥ जगत्यनुध्यानबलेन शश्वत्कृतार्थयत्सु प्रसभं भवत्सु । किमाश्रितोऽन्यैः शरणं त्वदन्यः स्वमांसदानेन वृथा कृपालुः ॥ ६ ॥ स्वयं कुमार्गं लपतां नु नाम प्रलम्भमन्यानपि लम्भयन्ति । सुमार्गगं तद्विदमादि-

शन्तमसूययान्धा अवमन्वते च ॥७॥ प्रादेशिकेभ्यः परशासनेभ्यः पराजयो यत्तव शासनस्य। खद्योतपोतद्युतिडम्बरेभ्यो विडम्बनेयं हरिमण्डलस्य ॥८॥ शरण्य पुण्ये तव शासनेऽपि सन्देग्धि यो विप्रतिपद्यते वा। स्वादौ स तथ्ये स्वहिते च पथ्ये सन्देग्धि वा विप्रतिपद्यते वा ॥९॥ हिंसाद्यसत्कर्मपथोपदेशादसर्वविन्मूलतया प्रवृत्तेः। नृशंसदुर्बुद्धिपरिग्रहाच्च ब्रूमस्त्वदन्यागममप्रमाणम् ॥१०॥ हितोपदेशात्सकलज्ञक्लृप्तेर्मुमुक्षुसत्साधुपरिग्रहाच्च। पूर्वापरार्थेऽप्यविरोधसिद्धेस्त्वदागमा एव सतां प्रमाणम्।११। क्षिप्येत वान्यैः सदृशीक्रियेत वा तवाङ्घ्रिपीठे लुठनं सुरेशितुः। इदं यथावस्थितवस्तुदेशनं परैः कथङ्कारमपाकरिष्यते ॥१२॥ तद्दुःखमाकालखलायितं वा पचेलिमं कर्म भवानुकूलम्। उपेक्षते यत्तव शासनार्थमयं जनो विप्रतिपद्यते वा ॥१३॥ परःसहस्राः शरदस्तपांसि युगान्तरं योगमुपासतां वा। तथापि ते मार्गमनापतन्तो न मोक्ष्यमाणा अपि यान्ति मोक्षम् ॥१४॥ अनाप्तजाड्यादिविनिर्मितित्वसम्भावनासम्भविविप्रलम्भाः। परोपदेशाः परमाप्तक्लृप्तपथोप-

देशे किमु संरभन्ते ॥१५॥ यदार्जवादुक्तमयुक्तमन्यै-
स्तदन्यथाकारमकारि शिष्यैः । न विप्लवोऽयं तव
शासनेऽभूदहो अधृष्या तव शासनश्रीः ॥ १६ ॥
देहाद्ययोगेन सदाशिवत्वं शरीरयोगादुपदेशकर्म ।
परस्परस्पर्धि कथं घटेत परोपक्लृप्तेष्वधिदैवतेषु ॥१७॥
प्रागेव देवान्तरसंश्रितानि रागादिरूपाण्यवमन्तराणि ।
न मोहजन्यां करुणामपीश समाधिमास्थाय युगा-
श्रितोऽसि ॥ १८ ॥ जगन्ति भिन्दन्तु सृजन्तु वा
पुनर्यथा तथा वा पतयः प्रवादिनाम् । त्वदेकनिष्ठे
भगवन्! भवक्षयक्षमोपदेशे तु परं तपस्विनः ॥१९॥
वपुश्च पर्यङ्कशयं श्लथं च दृशौ च नासानियते स्थिरे
च। न शिक्षितेयं परतीर्थनाथैर्जिनेन्द्र मुद्रापि तवा-
न्यदास्ताम् ॥ २० ॥ यदीयसम्यक्त्वबलात्प्रतीमो
भवादृशानां परमस्वभावम् । कुवासनापाशविनाशनाय
नमोऽस्तु तस्मै तव शासनाय ॥२१॥ अपक्षपातेन
परीक्षमाणा. द्वयं द्वयस्याप्रतिमं प्रतीमः । यथा-
स्थितार्थप्रथनं तवैतदस्थाननिर्बन्धरसं परेषाम् ॥२२॥
अनाद्यविद्योपनिषन्निषण्णैर्विशृङ्खलैश्चापलमाचरद्भिः ।
अमूढलक्ष्योऽपि पराक्रिये यत्त्वत्किङ्करः किं करवाणि

देव ! ॥२३॥ विमुक्तवैरव्यसनानुबन्धाः श्रयन्ति यां शाश्वतवैरिणोऽपि । परैरगम्यां तव योगिनाथ ! तां देशनाभूमिमुपाश्रयेऽहम् ॥ २४ ॥ मदेन मानेन मनोभवेन क्रोधेन लोभेन च सम्मदेन । पराजितानां प्रसभं सुराणां वृथैव साम्राज्यरुजा परेषाम् ॥२५॥ स्वकण्ठपीठे कठिनं कुठारं परे किरन्तः प्रलपन्तु किञ्चित् । मनीषिणां तु त्वयि वीतराग ! न राग-मात्रेण मनोऽनुरक्तम् ॥२६॥ सुनिश्चितं मत्सरिणो जनस्य न नाथ मुद्रामतिशेरते ते । माध्यस्थ्यमा-स्थाय परीक्षका ये मणौ च काचे च समानुबन्धाः २७ इमां समक्षं प्रतिपक्षसाक्षिणामुदारघोषामवघोषणां ब्रुवे । न वीतरागात्परमस्ति दैवतं न चाप्यनेकान्तमृते नयस्थितिः ॥ २८ ॥ न श्रद्धयैव त्वयि पक्षपातो न द्वेषमात्रादरुचिः परेषु । यथावदाप्तत्वपरीक्षया तु त्वामेव वीर प्रभुमाश्रिताः स्मः ॥ २९ ॥ तमः स्पृशामप्रतिभासभाजं भवन्तमप्याशु विविन्दते याः । महेम चन्द्रांशुदृशावदातास्तास्तर्कपुण्या जगदीश वाचः ॥३०॥ यत्र तत्र समये यथा तथा योऽसि सोऽस्य-भिधया यया तया । वीतदोषकलुषः स चेद्भवानेक

एव भगवन्नमोऽस्तु ते ॥३१॥ इदं श्रद्धामात्रं तदथ परनिन्दां मृदुधियो विगाहन्तां हन्त प्रकृतिपरवादव्यसनिनः। अरक्तद्विष्टानां जिनवर! परीक्षाक्षमधियामयं तत्त्वालोकस्स्तुतिमयमुपाधिं विधृतवान् ।३२।

इति कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिविरचितम-
योगव्यवच्छेदिकाद्वात्रिंशिकाख्यं श्रीमहावीरस्वामिस्तोत्रम् ।

---

अन्ययोगव्यवच्छेदिकाद्वात्रिंशिकाख्यं

## श्रीमहावीरस्वामिस्तोत्रम् ।

अनन्तविज्ञानमतीतदोषमबाध्यसिद्धान्तममर्त्यपूज्यम् । श्रीवर्धमानं जिनमाप्तमुख्यं स्वयम्भुवं स्तोतुमहं यतिष्ये ॥१॥ अयं जनो नाथ तव स्तवाय गुणान्तरेभ्यः स्पृहयालुरेव । विगाहतां किं तु यथार्थवादमेकं परीक्षाविधिदुर्विदग्धः ॥ २ ॥ गुणेष्वसूयां दधतः परेऽमी मा शिश्रियन्नाम भवन्तमीशम् । तथापि सम्मील्य विलोचनानि विचारयन्तां नयवर्त्म सत्यम् ॥ ३ ॥ स्वतोऽनुवृत्तिव्यतिवृत्तिभाजो भावा न भावान्तरनेयरूपाः । परात्मतत्त्वादतथात्मतत्त्वाद् द्वयं वदन्तोऽकुशलाः स्खलन्ति ॥४॥ आदीपमाव्योम समस्वभावं स्याद्वादमुद्रानतिभेदि वस्तु । तन्नित्य-

मेवैकमनित्यमन्यदिति त्वदाज्ञाद्विषतां प्रलापाः ॥५॥
कर्तास्ति कश्चिज्जगतः स चैकः स सर्वगः स स्ववशः
स नित्यः । इमाः कुहेवाकविडम्बनाः स्युस्तेषां न
येषामनुशासकस्त्वम् ॥ ६ ॥ न धर्मधर्मित्वमतीवभेदे
वृत्त्यास्ति चेन्न त्रितयं चकास्ति । इहेदमित्यस्ति
मतिश्च वृत्तौ न गौणभावोऽपि च लोकबाधः ॥७॥
सतामपि स्यात्क्वचिदेव सत्ता चैतन्यमौपाधिकमात्म-
नोऽन्यत् । न संविदानन्दमयी च मुक्तिः सुसूत्रमा-
सूत्रितमत्वदीयैः ॥८॥ यत्रैव यो दृष्टगुणः स तत्र
कुम्भादिवन्निष्प्रतिपक्षमेतत् । तथापि देहाद्बहिरात्म-
तत्त्वमतत्त्ववादोपहताः पठन्ति ॥९॥ स्वयं विवाद-
ग्रहिले वितण्डापाण्डित्यकण्डूलमुखे जनेऽस्मिन् ।
मायोपदेशात् परमर्म भिन्दन्नहो विरक्तो मुनिरन्यदीयः
॥१०॥ न धर्महेतुर्विहितापि हिंसा नोत्सृष्टमन्यार्थ-
मपोद्यते च । स्वपुत्रघातान्नृपतित्वलिप्सासब्रह्मचारि
स्फुरितं परेषाम् ॥११॥ स्वार्थावबोधक्षम एव बोधः
प्रकाशते नार्थकथान्यथा तु । परे परेभ्यो भयत-
स्तथापि प्रपेदिरे ज्ञानमनात्मनिष्ठम् ॥१२॥ माया
सती चेद्द्वयतत्त्वसिद्धिरथासती हन्त कुतः प्रपञ्चः ।

मायैव चेदर्थसहा च तत् किं माता च वन्ध्या च भवत्परेषाम् ॥ १३ ॥ अनेकमेकात्मकमेव वाच्यं द्वयात्मकं वाचकमप्यवश्यम् । अतोऽन्यथा वाचकवाच्यक्लृप्तावतावकानां प्रतिभाप्रमादः ॥ १४ ॥ चिदर्थशून्या च जडा च बुद्धिः शब्दादि तन्मात्रजमम्बरादि । न बन्धमोक्षौ पुरुषस्य चेति कियज्जडैर्न ग्रथितं विरोधि ॥ १५ ॥ न तुल्यकालः फलहेतुभावो हेतौ विलीने न फलस्य भावः । न संविदद्वैतपथेऽर्थसंविद्विलूनशीर्णं सुगतेन्द्रजालम् ॥१६॥ विना प्रमाणं परवन्न शून्यः स्वपक्षसिद्धेः पदमश्नुवीत । कुप्येत् कृतान्तः स्पृशते प्रमाणमहो सुदृष्टं त्वदसूयिदृष्टम् ॥१७॥ कृतप्रणाशाकृतकर्मभोगभवप्रमोक्षस्मृतिभङ्गदोषान् । उपेक्ष्य साक्षात् क्षणभङ्गमिच्छन्नहो महासाहसिकः परस्ते ॥ १८ ॥ सा वासना सा क्षणसन्ततिश्च नाभेदभेदानुभयैर्घटेते । ततस्तटादर्शिशकुन्तपोतन्यायात्त्वदुक्तानि परे श्रयन्तु ॥ १९ ॥ विनानुमानेन पराभिसन्धिमसंविदानस्य तु नास्तिकस्य । न साम्प्रतं वक्तुमपि क्व चेष्टा क्व दृष्टमात्रं च हहा प्रमादः ॥२०॥ प्रतिक्षणोत्पादविनाशयोगि

स्थिरैकमध्यक्षमपीक्षमाणः । जिन त्वदाज्ञामवमन्यते
यः स वातकी नाथ पिशाचकी वा ॥२१॥ अनन्त-
धर्मात्मकमेव तत्त्वमतोऽन्यथा सत्त्वमसूपपादम् । इति
प्रमाणान्यपि ते कुवादिकुरङ्गसन्त्रासनसिंहनादाः ।२२।
अपर्ययं वस्तु समस्यमानमद्रव्यमेतच्च विविच्यमानम् ।
आदेशभेदोदितसप्तभङ्गमदीदृशस्त्वं बुधरूपवेद्यम् ।२३।
उपाधिभेदोपहितं विरुद्धं नार्थेष्वसत्त्वं सदवाच्यते च ।
इत्यप्रबुध्यैव विरोधभीता जडास्तदेकान्तहताः पतन्ति
॥२४॥ स्यान्नाशि नित्यं सदृशं विरूपं वाच्यं न
वाच्यं सदसत्तदेव । विपश्चितां नाथ निपीततत्त्व-
सुधोद्गतोद्गारपरम्परेयम् ॥२५॥ य एव दोषाः किल
नित्यवादे विनाशवादेऽपि समास्त एव । परस्पर-
ध्वंसिषु कण्टकेषु जयत्यधृष्यं जिन शासनं ते ॥२६॥
नैकान्तवादे सुखदुःखभोगौ न पुण्यपापे न च बन्ध-
मोक्षौ । दुर्नीतिवादव्यसनासिनैव परैर्विलुप्तं जगद-
प्यशेषम् ॥२७॥ सदेव सत्स्यात् सदिति त्रिधार्थो
मीयेत दुर्नीतिनयप्रमाणैः । यथार्थदर्शी तु नय-
प्रमाणपथेन दुर्नीतिपथं त्वमास्थः ॥२८॥ मुक्तोऽपि
वाभ्येतु भवं भवो वा भवस्थशून्योऽस्तु मितात्मवादे ।
षड्जीवकायं त्वमनन्तसङ्ख्यमाख्यस्तथा नाथ यथा

न दोषः ॥२९॥ अन्योन्यपक्षप्रतिपक्षभावाद्यथा परे मत्सरिणः प्रवादाः । नयानशेषानविशेषमिच्छन्न पक्ष-पाती समयस्तथा ते ॥३०॥ वाग्वैभवं ते निखिलं विवेक्तुमाशास्महे चेन्महनीयमुख्य । लङ्घेम जङ्घा-लतया समुद्रं वहेम चन्द्रद्युतिपानतृष्णाम् ॥३१॥ इदं तत्त्वातत्त्वव्यतिकरकरालेऽन्धतमसे जगन्मायाकारैरिव हतपरैर्हा विनिहितम् । तदुद्धर्तुं शक्तो नियतमविसंवादि-वचनस्त्वमेवातस्त्रातस्त्वयि कृतसपर्याः कृतधियः॥३२।

---

## ॥ अथ श्री महादेव स्तोत्र ॥

प्रशान्तं दर्शनं यस्य, सर्वभूताभयप्रदम् । माङ्गल्यं च प्रशस्तं च, शिवस्तेन विभाव्यते ॥ १ ॥ महत्त्वादी-श्वरत्वाच्च यो महेश्वरतां गतः । रागद्वेषविनिर्मुक्तं, वन्देऽहं तं महेश्वरम् ॥ २ ॥ महाज्ञानं भवेद्यस्य, लोकालोकप्रकाशकम् । महादया दमो ध्यानं, महा-देवः स उच्यते ॥ ३ ॥ महान्तस्तस्करा ये तु, तिष्ठन्तः स्वशरीरके । निर्जिता येन देवेन, महादेवः स उच्यते ॥ ४ ॥ रागद्वेषौ महामल्लौ, दुर्जयौ येन निर्जितौ । महादेवं तु तं मन्ये, शेषा वै नामधारकाः

॥ ५ ॥ शब्दमात्रो महादेवो; लौकिकानां मते मतः । शब्दतो गुणतश्चैवाऽर्थतोऽपि जिनशासने ॥ ६ ॥ शक्तितो व्यक्तिश्चैव, विज्ञानं लक्षणं तथा । मोह-जालं हतं येन, महादेवः स उच्यते ॥ ७ ॥ नमोऽस्तु ते महादेव ! महामदविवर्जित ! । महालोभविनि-र्मुक्त !, महागुणसमन्वित ! ॥ ८ ॥ महारागो महाद्वेषो, महामोहस्तथैव च । कषायश्च हतो येन महादेवः स उच्यते ॥ ९ ॥ महाकामो हतो येन महाभयविवर्जितः । महाव्रतोपदेशी च महादेवः स उच्यते ॥ १० ॥

महाक्रोधो महामानो, महामाया महामदः । महालोभो हतो येन, महादेवः स उच्यते ॥११॥ महानन्दो दया यस्य, महाज्ञानी महातपाः । महा-योगी महामौनी, महादेवः स उच्यते ॥ १२ ॥ महावीर्यं महाधैर्यं, महाशीलं महागुणः । महामंजुक्षमा यस्य, महादेवः स उच्यते ॥१३॥ स्वयम्भूतं यतो ज्ञानं, लोकालोकप्रकाशम् । अनन्तवीर्यचारित्रं, स्वयम्भुः सोऽभिधीयते ॥ १४ ॥ शिवो यस्माज्जिनः प्रोक्तः, शङ्करश्च प्रकीर्तितः । कायोत्सर्गी च पर्यङ्की स्त्री-शस्त्रादिविवर्जितः ॥१५॥ साकारोऽपि ह्यनाकारो, मूर्त्तामूर्त्तस्तथैव च । परमात्मा च बाह्यात्मा, अन्तरात्मा

Aacharya vijay shri Surendrasuriswarji Jain Tatvagyanshala


तथैव च ॥ १६ ॥ दर्शनज्ञानयोगेन, परमात्माऽयमव्ययः। परा क्षान्तिरहिंसा च परमात्मा स उच्यते ॥ १७ ॥ परमात्मा सिद्धिसम्प्राप्तौ, बाह्यात्मा तु भवान्तरे । अन्तरात्मा भवेद्देह, इत्येषस्त्रिविधः शिवः ॥१८॥ सकलो दोषसम्पूर्णो, निष्कलो दोषवर्जितः । पञ्चदेहविनिर्मुक्तः, सम्प्राप्तः परमं पदम् ॥ १९ ॥ एकमूर्त्तिस्त्रयो भागा, ब्रह्मविष्णुमहेश्वराः । तान्येव पुनरुक्तानि, ज्ञानचारित्रदर्शनात् ॥ २० ॥ एकमूर्त्तिस्त्रयो भागा, ब्रह्मविष्णुमहेश्वराः । परस्परं विभिन्नानामेकमूर्तिः कथं भवेत् ? ॥ २१ ॥ कार्यं विष्णुः क्रिया ब्रह्मा, कारणं तु महेश्वरः । कार्यकारणसम्पन्ना, एकमूर्त्तिः कथं भवेत् ? ॥ २२ ॥ प्रजापतिसुतो ब्रह्मा, माता पद्मावती स्मृता । अभिजिज्जन्मनक्षत्रमेकमूर्त्तिः कथं भवेत् ? ॥ २३ ॥ वसुदेवसुतो विष्णुर्माता च देवकी स्मृता । रोहिणी जन्मनक्षत्रमेकमूर्त्तिः कथं भवेत् ? ॥ २४ ॥ पेढालस्य सुतो रुद्रो, माता च सत्यकी स्मृता । मूलं च जन्मनक्षत्रमेकमूर्त्तिः कथं भवेत् ? ॥ २५ ॥ रक्तवर्णो भवेद् ब्रह्मा, श्वेतवर्णो महेश्वरः । कृष्णवर्णो भवेद् विष्णुरेकमूर्त्तिः कथं भवेत् ? ॥ २६ ॥ अक्षसूत्री भवेद् ब्रह्मा, द्वितीयः

www.jaintatvagyanshala.org

शूलधारकः । तृतीयः शङ्खचक्राङ्क, एकमूर्त्तिः कथं भवेत् ? ॥ २७ ॥ चतुर्मुखो भवेद् ब्रह्मा, त्रिनेत्रोऽथ महेश्वरः । चतुर्भुजो भवेद् विष्णुरेकमूर्तिः कथं भवेत् ? ॥ २८ ॥ मथुरायां जातो ब्रह्मा, राजगृहे महेश्वरः । द्वारामत्यामभूद् विष्णुरेकमूर्तिः कथं भवेत् ? ॥२९॥ हंसयानो भवेद् ब्रह्मा, वृषयानो महेश्वरः । गरूडयानो भवेद् विष्णुरेकमूर्तिः कथं भवेत् ? ॥ ३० ॥ पद्म-हस्तो भवेद् ब्रह्मा शूलपाणिर्महेश्वरः चक्रपाणिर्भवेद् विष्णुरेकमूर्तिः कथं भवेत् ? ॥ ३१ ॥ कृते जातो भवेद् ब्रह्मा, त्रेतायां च महेश्वरः । द्वापरे जनितो विष्णुरेकमूर्त्तिः कथं भवेत् ? ॥ ३२ ॥

ज्ञानं विष्णुः सदा प्रोक्तं, चारित्रं ब्रह्म उच्यते । सम्यक्त्वं तु शिवं प्रोक्तमर्हन्मूर्तिस्त्रयात्मिका ॥ ३३ ॥ क्षितिजलपवनहुताशन यजमानाऽऽकाशसोमसूर्याख्याः। इत्येतेऽष्टौ भगवति, वीतरागे गुणा मताः ॥ ३४ ॥ क्षितिरित्युच्यते क्षान्तिर्जलं या च प्रसन्नता । निःसङ्गता भवेद्वायुर्हुताशो योग उच्यते ॥ ३५ ॥ यजमानो भवेदात्मा, तपोदानदयादिभिः । अलेप-कत्वादाकाशसङ्काशः सोऽभिधीयते ॥ ३६ ॥ सौम्य-मूर्तिरुचिश्चन्द्रो वीतरागः समीक्ष्यते । ज्ञानप्रकाशकत्वेन

Aacharya vijay shri Surendrasuriswarji Jain Tatvagyanshala


आदित्यः स्कोऽभिधीयते ॥ ३७ ॥ पुण्यपापविनिर्मुक्तो, रागद्वेषविवर्जितः । श्रीअर्हद्भ्यो नमस्कारः, कर्तव्यः शिवमिच्छता ॥ ३८ ॥ अकारेण भवेद् विष्णु, रेफे ब्रह्मा व्यवस्थितः । हकारेण हरः प्रोक्तस्तस्यान्ते परमं पदम् ॥ ३९ ॥ अकार आदिधर्मस्य, आदिमोक्षप्रदेशकः, स्वरूपे परमं ज्ञानमकारस्तेन उच्यते ॥ ४० ॥ रूपिद्रव्यस्वरूपं वा, दृष्ट्वा ज्ञानेन चक्षुषा । द्रष्टं लोकमलोकं वा रकारस्तेन उच्यते ॥ ४१ ॥ हताः रागाश्च द्वेषाश्च हता मोहपरीषहाः । हतानि येन कर्माणि, हकारस्तेन उच्यते ॥ ४२ ॥ सन्तोषेणाभिसम्पूर्णः प्रातिहार्याष्टकेन च । ज्ञात्वा पुण्यं च पापं च, नकारस्तेन उच्यते ॥ ४३ ॥ भवबीजाङ्कुरजनना, रागाद्याः क्षयमुपागता यस्य । ब्रह्मा वा विष्णुर्वा हरो जिनो वा नमस्तस्मै ॥ ४४ ॥

---

## आचार्य श्री रत्नाकरसूरिविरचिता

# श्री रत्नाकरपञ्चविंशतिका

श्रेयःश्रियां मङ्गलकेलिसद्म ! नरेन्द्रदेवेन्द्रनतांघ्रिपद्म ! सर्वज्ञ सर्वातिशयप्रधान ! चिरं जय ज्ञानकलानिधान ! ॥१॥ जगत्त्रयाधार ! कृपावतार !

www.jaintatvagyanshala.org

दुर्वारसंसारविकारवैद्य ! । श्रीवीतराग ! त्वयि मुग्ध-
भावाद्विज्ञप्रभो ! विज्ञपयामि किञ्चित् ॥ २ ॥ किं
बाललीलाकलितो न बालः, पित्रोः पुरो जल्पति
निर्विकल्पः । तथा यथार्थं कथयामि नाथ ! निजा-
शयं सानुशयस्तवाग्रे ॥३॥ दत्तं न दानं परिशीलितं
च न शालि शीलं न तपोऽभितप्तम् । शुभो न
भावोऽप्यभवद्भवेऽस्मिन् विभो ! मया भ्रान्तमहो
मुधैव ॥४॥ दग्धोऽग्निना क्रोधमयेन दष्टो, दुष्टेन
लोभाख्यमहोरगेण । ग्रस्तोऽभिमानाजगरेण, माया–
जालेन बद्धोऽस्मि कथं भजे त्वाम् ॥ ५ ॥ कृतं
मयाऽमुत्र हितं न चेहलोकेऽपि लोकेश ! सुखं न
मेऽभूत् । अस्मादृशां केवलमेव जन्म, जिनेश ! जज्ञे
भवपूरणाय ॥ ६ ॥ मन्ये मनो यन्न मनोज्ञवृत्तं,
त्वदास्यपीयूषमयूखलाभात् । द्रुतं महानंदरसं कठोरम-
स्मादृशां देव तदश्मतोऽपि ॥ ७ ॥ त्वत्तः सुदुः-
प्राप्यमिदं मयाप्तं रत्नत्रयं भूरिभवभ्रमेण । प्रमाद-
निद्रावशतो गतं तत्, कस्याग्रतो नायक ! पूत्करोमि
॥८॥ वैराग्यरङ्गोऽपरवञ्चनाय, धर्मोपदेशो जनरञ्जनाय ।
वादाय विद्याऽध्ययनं च मेऽभूत्, कियद् ब्रुवे
हास्यकरं स्वमीश ! ॥९॥ परापवादेन मुखं सदोषम्,

नेत्रं परस्त्रीजनवीक्षणेन । चेतः पराऽपायविचिन्तनेन कृतं भविष्यामि कथं विभोऽहम् ॥१०॥ विडम्बितं यत्स्मरघस्मरार्तिदशावशात्स्वं विषयान्धलेन । प्रकाशितं तद्भवतो ह्रियैव, सर्वज्ञ! सर्वं स्वयमेव वेत्सि ॥ ११ ॥ ध्वस्तोऽन्यमन्त्रैः परमेष्ठिमन्त्रः, कुशास्त्रवाक्यैर्निहतागमोक्तिः । कर्तुं वृथा कर्म कुदेवसङ्गाद-वाञ्छि ही नाथ मतिभ्रमो मे ॥ १२ ॥ विमुच्य दृग्लक्ष्यगतं भवन्तम् , ध्याता मया मूढधिया हृदन्तः । कटाक्षवक्षोजगभीरनाभिकटीतटीयाः सुदृशां विलासाः ॥१३॥ लोलेक्षणावक्त्रनिरीक्षणेन, यो मानसे रागलवो विलग्नः । न शुद्धसिद्धान्तपयोधिमध्ये, धौतोऽप्यगात्तारक ! कारणं किम् ॥१४॥ अङ्गं न चङ्गं न गणो गुणानां, न निर्मलः कोऽपि कलाविलासः । स्फुरत्प्रभा न प्रभुता च कापि, तथाप्यहङ्कारकदर्थितोऽहम् ॥१५॥ आयुर्गलत्याशु न पापबुद्धिर्गतं वयो नो विषयाभिलाषः । यत्नश्च भैषज्यविधौ न धर्मे, स्वामिन्महामोहविडम्बना मे ॥१६॥ नात्मा न पुण्यं न भवो न पापं, मया विटानां कटुगीरपीयम् । अधारि कर्णे त्वयि केवलार्के, पुरः स्फुटे सत्यपि देव ! धिङ् माम् ॥१७॥ न देवपूजा न च पात्रपूजा, न श्राद्धधर्मश्च न साधुधर्मः । लब्ध्वापि मानुष्य-

मिदं समस्तं, कृतं मयाऽरण्यविलापतुल्यम् ॥१८॥ चक्रे मयाऽसत्स्वपि कामधेनुकल्पद्रुचिन्तामणिषु स्पृहार्त्तिः। न जैनधर्मे स्फुटशर्मदेऽपि, जिनेश! मे पश्य विमूढभावम् ॥ १९ ॥ सद्भोगलीला न च रोगकीला, धनागमो नो निधनागमश्च। दारा न कारा नरकस्य चित्ते व्यचिन्ति नित्यं मयकाऽधमेन ॥ २० ॥ स्थितं न साधोर्हृदि साधुवृत्तात्, परोपकारान्न यशोऽर्जितं च। कृतं न तीर्थोद्धरणादि कृत्यं, मया मुधा हारितमेव जन्म ॥२१॥ वैराग्यरङ्गो न गुरूदितेषु, न दुर्जनानां वचनेषु शान्तिः। नाऽध्यात्मलेशो मम कोऽपि देव, तार्यः कथङ्कारमयं भवाब्धिः ॥२२॥ पूर्वं भवेऽकारि मया न पुण्यमागामिजन्मन्यपि नो करिष्ये। यदीदृशोऽहं मम तेन नष्टा, भूतोद्भवद्भाविभवत्रयीश! ॥ २३ ॥ किं वा मुधाऽहं बहुधा सुधाभुक्पूज्य त्वदग्रे चरितं स्वकीयम्। जल्पामियस्मात् त्रिजगत्स्वरूपनिरूपकस्त्वं कियदेतदत्र ॥२४॥ दीनोद्धारधुरन्धरस्त्वदपरो नास्ते मदन्यः कृपापात्रं नात्र जने जिनेश्वर! तथाऽप्येतां न याचे श्रियम्। किन्त्वर्हन्निदमेव केवलमहो सद्बोधिरत्नं शिवं, श्रीरत्नाकर! मङ्गलैकनिलय! श्रेयस्करं प्रार्थये ॥२५॥ इति श्रीरत्नाकरपञ्चविंशतिका

Aacharya vijay shri Surendrasuriswarji Jain Tatvagyanshala



भरत प्रिन्टरी,
रीलीफ रोड, अहमदाबाद.
फोन : ३८ ७९ ६४

www.jaintatvagyanshala.org